
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशाय नमः॥ अथ गृह्यसूत्रविहितानामाधानादिसर्वकर्मणां साधारणो विधिरुच्यते। तत्रावसथ्याधानादिषु
[illegible]कर्मसु सर्वकर्मसु यजमानस्यैव कर्तृत्वं। ऋत्विगितरस्यानभिधानात्। परिसमुह्येत्यादि। शुद्धायां भूमौ दर्भैः
त्रिः समूहनं। गोमयेनोपलेपनं। स्फ्यादिरेण स्रुवेणोल्लेखनं। अनामिकांगुष्ठेनोद्धरणं। उदकेनाभ्युक्षणं। एवं पञ्चभूसं
स्कारान् कृत्वा तत्राग्नेः स्थापनं तत्र तत्र क्रियते। यत्र तु स्वस्थानस्थित एवावसथ्याग्नौ कर्म क्रियते तत्रैतेन क्रियंते। तत्राग्नेः
स्थापनं। अग्नेर्दक्षिणतो ब्रह्मासनास्तरणं। तत्र ब्रह्मोपवेशनं। वारणमुदचमसं भूमौ निधायालभ्य प्रणी। प्रोक्ष
तोमे स्थापनं। बर्हिषा प्रदक्षिणमग्नेः परिस्तरणं। अर्थवत्पात्रासादनं। तत्र पवित्रच्छेदनानि त्रीणि। पवित्रे द्वे।
प्रोक्षणीपात्रं कारणं। आज्यस्थाली। चरुस्थाली। संमार्गकुशाः। उपयमनकुशाः। समिधस्तिस्रः। [illegible]पः। स्रुवः। आ
[illegible]मा[illegible]कारत्निमात्रः स्रुवः खादिरः। आज्यं। व्रीहितंडुलाः। दर्भपात्रे दक्षिणवरो वा। पवित्रच्छेदनैः पवित्रकरणं। प्रो
क्षणीपात्रे प्रणीतोदकमासिच्य पदि[illegible]नाम्यानुसवनं। प्रोक्षणीनां [illegible]करणं। दक्षिणेनोदिंगनं। प्रणीताः स्थेन

प्रोक्षणीनां प्रोक्षणं। ततो यथासादितपात्राणामेकैकस्य प्रोक्षणं प्रोक्षण्युदकेन। असंचरे प्रोक्षणीनां निधानं। आ
ज्यस्थाल्यामाज्यनिर्वापः। सपवित्रे कंवरपात्रे प्रणीतोदकमासिच्य तंडुलप्रक्षेपः। आज्याधिश्रयणं। चरोरधिश्रय
णमग्न्योरुत्तरतः। पर्यग्निकरणमुभयोः। इदं छृतेन चरोः स्रुवप्रतपनं। संमार्गकुशैः स्रुवसंमार्जनं। प्रणीतोदकेन प्रोक्षणं। पु
नः प्रतपनं। दक्षिणतो निधानं। आज्यस्योद्वासनं। चरोरुद्वासनं। आज्यस्योत्पवनं। अवेक्षणं। अपद्रव्यनिरसनं। उपयम
नकुशादानं। तिष्ठतः समिधोपादानं। प्रोक्षण्युदकेन स दक्षिणपर्युक्षणं। पवित्रयोः प्रणीतासु निधानं। अथ दक्षिणं जा
न्वाच्य जुहोतीति स्थानं उपविष्टः स्रुवेण जुहोतीति। आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृ
च्चेत्येतन्नित्यं आहुतयो ब्रह्मणोन्वारब्धे सर्वकर्मसु होतव्याः आज्योर्नेन क्विष्टकृद्वानयमः। यत्र एषि संभवति तत्र ह[illegible]। यत्र हवि
व नीतिलितव्राज्येन। एतास्वेव चतुर्दशाहुतिषु सर्वत्र ब्रह्मान्वारंभो नान्यासु। तत्र विशेषवक्तव्यो नासावपर्युक्षणानंतरं सर्वत्राघारा
तावाज्यभागहोमः। तत्र स्थाल्याः स्रुवेणादाय प्रजापतिं मनसा ध्यात्वा संततं मनं प्राचीनं दीर्घं पूर्वाघारं जुहोति। एवमे

त्राघारमिंद्रायस्वाहेति। तत आज्यभागौ। आज्यभागमग्नयेस्वाहा सन्नेरुत्तरतः पूर्वार्द्धे सौम्यं सोमायस्वाहेति दक्षिणपूर्वार्द्धे

समिद्धतमे वाग्निप्रदेशे। सर्वाहुतीनां होमः। ततो महाव्याहृत्यादिनवाज्याहुतिहोमो यथावसरे। तत्र भूः स्वाहा। भुवः स्वा

हा। स्वः स्वाहेति महाव्याहृतिहोमः। त्वन्नो अग्ने। स त्वन्नो अग्ने। अयाश्चाग्ने। ये ते शतं। उदुत्तममित्येताः पंचाहुतयः स

र्वप्रायश्चित्तसंज्ञिकाः। प्रजापतये स्वाहेति प्राजापत्यम्। अग्नये स्विष्टकृते स्वाहेति स्विष्टकृत् उत्तरार्द्धे [illegible]

एव होमः स्विष्टकृतः। एकैकामाहुतिं हुत्वा पात्रांतरे संस्रवप्राशनेभक्षणार्थम्। अवत्तस्यां सर्वहोमात्कृत्वा प्रो

प्राशनमिति विवनात्। मार्जनं। पवित्रप्रतिपत्तिः। बर्हिर्होमः। प्रणीताविमोकः। इत्येतेषां पदार्थाः सर्वकर्मसु

भवंतीति केचिन्मतं। विकृतव्यतिरेकेण कापि न भवंतीति बहूनां मतं। अविहितकालानां कर्मणां कृष्णायन आपू

र्यमाणपक्षे पुण्याहेनुष्ठानं। अथातोधिकार इत्यारभ्योपस्थरोदप इत्यंतेनाध्यायेन यदुक्तं तदपि यथासंभवं

सर्वकर्मस्वधिकृतं वेदितव्यं। एवं सर्वे साधारणं कर्मोक्तं। स्यादन्यच्च वेदितव्यात्। तत्तत्प्रतिकर्मसु वक्ष्यमिति।

रा

२

॥ श्री॥ ॥ पावसथ्याधानं चतुर्थ्यंते अपरकाले दारकाले वा धनविस्तारकाले वा। तत्र मातृपूजा नांदीश्राद्धं। परिसमुह्योपलिप्यो

ल्लिख्य। उद्धृत्याभ्युक्ष्य वैश्यस्य कुलाद्धाहृत्याग्नेः स्थापनं। निर्मथ्य वा। दक्षिणतो ब्रह्मासनास्तरणं। तत्र ब्रह्मोपवेश

नं। उत्तरतः प्रणीतापात्रायनं। परिस्तरणं। पात्रासादनं द्वंद्वमुत्तरतोग्नेः पश्चाद्वा। पवित्रे छेदनानि त्रीणि। पवित्रे द्वे। प्रो

क्षणीपात्रं। आज्यस्थाली। चरुस्थाली। संमार्गकुशाः। उपयमनकुशाः। समिधस्तिस्रः। स्रुवः। आज्यं। तंडुलाः। पू

र्णपात्रं दक्षिणा वरो वेति। पवित्रकरणं। प्रोक्षणीपात्रे प्रणीतोदकमासिच्योत्पवनं। प्रोक्षणीपात्रं सव्ये कृत्वोद

क्षिणेनोद्दिंगनं। तासां प्रोक्षणं प्रणीतोदकेन ततः प्रोक्षणीभिः यथासादितपात्रप्रोक्षणं। असंचरे प्रोक्षणीनां नि

धानं। आज्यनिर्वापणं। चरुपात्रे सोदके तंडुलप्रक्षेपः। चर्वाज्ययोः सहाधिश्रयणं। पर्यग्निकरणमुभयोः। स्रुवप्र

तपनं। संमार्गकुशैः संमार्गः। [illegible] तोदकेनाभ्युक्षणं। पुनः प्रतपनं। आज्योद्वासनं। चरोश्च। आज्योत्पवनं। अ

वेह्लग्नी। अपद्रव्यनिरसनं। प्रोक्षणीनां पुनरुत्पवनं। उपयमनकुशादानं। निष्टतः समित्प्रक्षेपः। प्रोक्षण्युदकेन पर्युक्षणं। अन्वारब्धे
दक्षिणे जान्वाच्य जुहोति स्थानस्थितस्य प्राङ्मुखस्य स्रुवेण होमः। ऊर्ध्वाज्ञ त्वा पात्रांतरे संस्रवप्रासनं। आघारावाज्यभागौ
महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृदन्वारब्धो अन्यत्सर्वमनन्वारब्धे। मनसा प्रजापतये स्वाहेति पालं
स्रुवोघार उत्तरतः। इदं प्रजापतये इति त्यागः। इंद्राय स्वाहेत्युत्तराघारः पूर्वाघारस्य दक्षिणतः। इदमिंद्राय। अग्नये स्वाहेत्या
ग्नेय आज्यभाग उत्तरपूर्वार्द्धे। इदमग्नये। सोमाय स्वाहेति सौम्य आज्यभागो दक्षिणपूर्वार्द्धे। इदं सोमाय। समिद्धसोम
इत्समेवाः सर्वा आहुतयः। ततो ऽष्टर्चहोमः। त्वन्नो अग्न इत्यादिभिर्मंत्रैर्भवतन्न इत्यंतैः स्वाहाकारांते सर्वत्र होममंत्रेषु नो
म्नातेपि स्वाहाकारो भवति। त्वन्नो अग्ने० प्रमुमुग्ध्यस्मत्स्वाहा। इदमग्नीवरुणाभ्यां।१ स त्वन्नो अग्ने० सुहवो न एधि स्वा
हा। इदमग्नीवरुणाभ्यां।२ इमं मे वरुण० राचके स्वाहा। इदं वरुणाय।३ तत्त्वा यामि० प्रमोषीः स्वाहा। इदं वरुणाय।४
ये ते शतं० स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः।५ इदं वरुणायेति केचित्।
अयाश्चाग्ने० भेषजं स्वाहा। इदमग्नये।६ उदुत्तमं० अदितये स्याम स्वाहा। इदं वरुणाय।७ भवतन्नः० द्विषो मव

स

राम

२

तमघवनः स्वाहा। इदं जातवेदोभ्यां।८ इदमग्निद्यामिति केचित्। अथ स्थालीपाकेन यत्र स्थालीपाकेय देवताः अग्नये पव
मानाय स्वाहा। इदमग्नये पवमानाय।।१।। अग्नये पावकाय स्वाहा। इदमग्नये पावकाय।।२।। अग्नये शुचये स्वाहा।
इदमग्नये शुचये।।३।। अदित्यै स्वाहा। इदमदित्यै।।४।। अथ पुनराज्येनाष्टर्चहोमः। त्वन्नो अग्न इत्यादि भवतन्न
इत्यंतैः स्विष्टकृत्स्थालीपाकेनान्वारब्धो अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। अथानन्वारब्धे अस्याय। ४
इत्याज्येन अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविदः स्वाहा। इदं देवेभ्यो गातुविद्भ्यः। अथ तिस्रो महाव्या
हृतयः। भूः स्वाहा। इदं भूः। भुवः स्वाहा। इदं भुवः। स्वः स्वाहा। इदं स्वः। अथ वा। इदमग्नये। इदं वायवे। इदं सूर्यायेति महा
व्याहृतित्यागः। अथ त्वन्नो अग्ने।१। स त्वन्नो अग्ने।२। अयाश्चाग्ने।३। ये ते शतं।४। उदुत्तममिति।५। पंच वरुणीः। इ
दं वरुणस्य त्यागः। अथ प्राजापत्यं। प्रजापतये स्वाहा। इदं प्रजापतये। बर्हिर्होमः। संस्रवप्राशनं। मार्जनं। पवित्रप्रति

१०।६०
४
ब

पवित्रिणः ब्राह्मणे पात्रद्वयोरन्यतरस्य दाने। प्रणीताविमोकः। एकब्राह्मणभोजने। मोर्जने। पवित्रप्रतिपत्तिः। बर्हिर्होमः। प्रणीताविमोक
इत्येते पदार्था विवर्जिताः। वा आश्वलायनकारमते गृह्यकर्मसु न भवंति। बर्हिर्होमो स्विष्टकृद्वचनात् भवति। इत्यावसथ्याधानं॥ ॥छ॥ अथ सर्वकर्म
साधारणपरिभाषा। यत्र स्वस्थाने स्थिते आवसथ्याग्नौ कर्म क्रियते। तत्र पंचभूसंस्कारा न भवंति। अन्यत्र सर्वत्र भवंति। दक्षिण
तो ब्रह्मासनमास्तीर्य स्थारम्भपर्युक्षणं कुर्यादित्यैमतं सर्वकर्मसाधारणं मेध्यं वर्जयेत्। आघारावाज्यभागौ महाव्याहृतयः सर्वप्रा
यश्चित्तं प्राजापत्यं स्विष्टकृदित्येता अष्टौ हुतयः सर्वहोमेषु न भवंति। ब्रह्मान्वारंभश्चैतास्वेव चतुर्दशाहुतिषु भवति। ना
न्यासु। विशेषवचनाभावे आघारावाज्यभागौ हुत्वा होमांतरं। अन्यत्सर्वं स्वावसरे एव कर्तव्यं॥ ॥छ॥ ॥अथ विवाहः कथ्यते॥ ॥छ॥
तत्र वरस्यार्घदानं स्मर्यते। तत्प्रसंगेन यावंतोऽर्घ्याः ते कथ्यंते। उपाचार्य ऋत्विग्विवाह्यो राजा प्रियः स्नातक इति। अथ सर्वसाधारणोऽर्घ
विधिरुच्यते। अर्घ्यायासनाहरणं। साधु भवानास्तामर्चयिष्यामो भवंतमित्यर्चयिता अर्घ्यः प्रतिवदति। अर्चयेत्यर्घ्यस्य प्रतिवचनं। विष्टरा
दीनामाहरणं। उपर्चयितुर्विष्टरदानं। अर्चयितृव्यतिरिक्तोऽन्यः अर्घ्यं संबोधयति। विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्यनेन।

राम
४

ततोऽर्घ्योऽर्चयितुः सकाशाद्विष्टरं प्रतिगृह्णाति। ततस्तं विष्टरमासने निधायोपविशति। वर्ष्मोऽस्मि समानानामुद्यता
मिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्यनेन मंत्रेण। ततः पाद्यस्य सुखोष्णोदकस्य दानमर्चयितुः
ततोऽन्योऽर्घ्यं संबोधयति। पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामिति। ततोऽर्घ्योऽर्चयितुः सकाशात्पाद्यं प्रतिगृह्य दक्षिणपादं प्र
क्षालयति। विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इत्यनेन। ततो वामपादप्रक्षालनमनेनै
व मंत्रेण। राजन्यवैश्ययोस्तु प्रथमं वामपादप्रक्षालनं। ततो दक्षिणस्य। पूर्ववद्द्वितीयो विष्टरः। इयांस्तु विशेषः। विष्ट
रं भूमौ कृत्वा तस्योपरि पादौ करोति वर्ष्मोऽस्मीत्यनेन मंत्रेण। ततोऽर्चयितुरर्घदानं। अन्यः प्राह। अर्घोऽर्घोऽर्घः प्रतिगृ
ह्यतामिति। ततोऽर्घ्योऽर्घं प्रतिगृह्णाति। आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानीत्यनेन। ततोऽर्घं शिरसाभिवंद्य
प्रागुत्सृज्य निनयन्नभिमंत्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत॥ अरिष्टा अस्माकं वीरा मा परासेचि मत्प
य इत्यनेन। अर्चयितुराचमनीयदाने अन्यः प्राह। आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति। त
तोऽर्चयिता आचमनं ददाति। अर्घ्य आचामति। आमागन्यशसा संसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधि

पतिं पश्चूनामरिरिहिंतनूनामित्यनेन संकृत्य । ततः [illegible] विमलं । ततो र्घ्ययित्वा मधुपर्कमादत्ते मधुपर्कश्च दधिमधु
घृतं कांस्यपात्रेकृतं कांस्यपात्रेण । पिहितं । अन्य [illegible] कां मधुपर्कं मधुपर्कः प्रतिगृह्यतामिति । ततोर्चयिता
हस्तस्थितं मधुपर्कं ईक्षते अर्घ्यः मित्रस्य त्वेत्यनेन [illegible] देवस्य त्वेति प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिण
स्यानामिकया मधुपर्कं प्रदक्षिणमालयति । नमः श्यावास्याय [illegible] शने यत्त आविद्धं तत्ते निष्कृन्तामीत्यनेन मंत्रेण
सकृत् । ततः अनामिकांगुष्ठेन मधुपर्कं करे शाप्रागुदग्वा क्षिपति । पुनरनामिकया आलोडयति मंत्रेण प्रदक्षि
णं पुनरनामिकांगुष्ठेन निरुक्षयति पूर्ववत् । एवं त्रिः पर्यग्निकरणं त्रिर्निरुक्षणं भवति । ततो मधुपर्कैकदेशं प्राश्ना
ति । यन्मधुनो मधव्यं परमं रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादो
सानीत्यनेन । पुनरप्यनेनैव मंत्रेण वारद्वयं [illegible] प्राश्नाति । मधुवाता ऋतायते इत्यनेन वा प्रत्यृचं मधु वा ता
इति त्र्यृचेन । मधुनक्तमिति द्वितीयेन । मधुमान्नो वनस्पतिरिति तृतीयेन । पुत्राय शिष्याय वा [illegible] उपविष्टाय उच्छिष्टं [illegible]

२

सर्वं वा मधुपर्कं प्राश्नीयात् । प्राग्वा असंचरे [illegible] तत्र क्षिपेदुच्छिष्टं । आचम्य प्राणान्संमृशति । वाङ्म आस्येस्त्विति मु
खमालभते । नसोर्मे प्राणोस्त्विति नासिकाछिद्रद्वये । अक्ष्णोर्मे चक्षुरस्त्विति अक्षिद्वये । कर्णयोर्मे श्रोत्रमस्त्विति दक्षिण
कर्णे । ततो वाममनेनैव मंत्रेण । बाह्वोर्मे बलमस्त्विति दक्षिणबाहुं । तत उत्तरमनेनैव । ऊर्वोर्मे ओजोस्त्विति ऊरुद्वयं ।
अरिष्टानि मेंगानि तनूस्तन्वा मे सहसंत्विति सर्वाण्यंगान्यालभते । ततो गामानीयार्चयिता शासमादाय गौर्गौर्गौरिति वदे
त् । तामित्यर्घ्यं प्रतिवदति । ततोर्घ्यः प्राह । माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्रनु वोचं चि
कितुषे जनाय मा गामनागामदितिं वधिष्ट । मम चामुष्य च पाप्मानं हनोमीत्यालभेत नापागविप्रयोगः । अमुष्य
शब्दमुद्दिश्यार्चयितुर्नाम गृह्णीयात् । उत्सृजत्यमानायां तु गावि [illegible] । एवं माता रुद्राणामित्युक्त्वा मम चामुष्य च पाप्मा
हत ॐ मुत्सृजत तृणान्यत्त्विति । अत्र त्रायमुष्य स्थाने अर्चयितुः नामादेशः । ॐकारमुपांशु [illegible] उत्सृजेत् [illegible]
वाह्यनियमेन गोरालंभः । अन्यच्छया । तत्र देवताः । आचार्याय [illegible] इमाः । ऋत्विजे पर्जन्यः । अग्नि [illegible]

८ अग्निना वाध्वर्यवे। वेवास्याय प्रजापतिः। राज्ञे इंद्रः। प्रियः। यमित्रः। विश्वेदेवाः स्नातकस्य। इंद्राग्नी वा। कर्मन्तत्तीये कौ
ध्या ख्यास्यत इति। अथ प्रकृतेविवाहकर्मोच्यते। तत्र पुण्येहनि वरस्य पितुः कन्यायाश्च पितुः स्वस्वपितृभ्यो मातृपू
जनपूर्वकं नांदीमुखं श्राद्धं। ततो विवाहार्थमागतस्य मधुपर्केणार्हणं। बहिः शालायां पंचभूसंस्कारान्कृत्वा वरस्य लौ
किकाग्नेः स्थापनं। निर्मथ्य वाग्निः स्थापनं। पश्चादग्नेस्तेजन्याः कटस्य स्थापनं। तेजनीतृणपूलकः। कुमार्या वासः
परिधापनं। जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा। शतं च जीव शरदः सुवर्चा रयिं च पुत्राननु
संव्ययस्वायुष्मतीदं परिधत्स्व वास इत्यनेन। मंत्रपाठो वरस्य। अथोत्तरीयं वासो वरः कन्यायै समर्पयति मंत्रमु
क्तमंत्रः। या अकृंतन्नवयं या अतन्वत याश्च देवीस्तंतूनभितो ततंथ। तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं प राम:
रिधत्स्व वास इति। अथ कन्यायाः पिता कुमार्यौ समंजयति। परस्परं समंजेथामित्यनेन प्रैषेण। समंजनं ८

सन्मुखीकरणं। समंजंतु विश्वेदेवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ इत्येतं मंत्रं सन्मुखीभूतो वरः
पठति। अथ कन्यादानं तत्र वाक्यं। अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्राय। अमुकगोत्रस्य अमुकप्रवरस्य अ
मुकशर्मणः पौत्राय। अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौत्रीं अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणो दु
हितरं। एवमेकः पर्यायः। एवमेव पुनः पर्यायत्रयमुक्त्वा पुनः अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे ब्राह्मणाय
अमुकगोत्रां अमुकप्रवरां अमुकनाम्नीमिमां कन्यां यथाशक्त्यलंकृतां प्रकल्पितां सपरिकरसाहितां प्रजापतिदैवतां
तुभ्यमहं संप्रददे। वरः प्रतिगृह्णातीति कन्यां। द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्वित्यनेन मंत्रेण। कन्यापिता पठति धर्मे
चार्थे च त्वयेयं नातिचरितव्या। अपित्र्याद् ग्राम्याद्वा न भूमति। यदृषिमनसा दूरं दिशोनुपवमानो वा। हिरण्यपर्णो वै
कर्णः स त्वा मन्मनसां करोत्वमुकी इत्यनेन मंत्रेण। निष्क्रमणापश्चात्लौकिकः पुरुषः उदकुंभस्कंधे कृत्वा दक्षिणतो नवाग्नि

तःस्विष्टि रा भवत्सुत्तरतो वा। उपनिषेकपर्यंतं। अथैनौ समीक्षयति कन्यापिता परस्परं समीक्षेथामित्यनेन प्रैषेण। ततः प्रे
षानंतरं वरः अघोरचक्षुरित्या द्वियस्याममुकामावहत्वा नि विक्ष्या इत्येतत्पर्यंतं। एतद्बलिख्यते। अघोरचक्षुरपतिघ्न्येधि शि
वा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे। सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः। तृती
यो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः। सोमोऽददद्गंधर्वाय गंधर्वो दददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां। सा नः पूषा शिवतमामैर
य सा न ऊरू उशती विहर। यस्यामुशंतः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इत्येतस्य मंत्रस्यांते परस्परमुत्तरीये निरीक्षणं। प्रदक्षि
णमग्निं परीत्य पश्चादग्नेस्तेजनीं कटं वा दक्षिणं पादेद्वोपाविशति। दक्षिणतो वरस्य वधूरुपविशति। वासः परिधानीं समंजनीं। प्रो
क्षोपवेशनादिपर्युक्षणांतं विशेषः। नात्र चरुः उपकल्प्यानी याभिः शमीपलाशमिश्राः लाजाः। अश्मा। लोहितमादृस्वमी कुमा
र्याभ्राता अर्थं देवपुरुषो। आचार्याय वरो दद्यादिति। आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तहोमः राष्ट्रभृज्जया
भ्यातानामिध्ययाहोमः। तत्र करणपक्षे सर्वप्रायश्चित्तानंतरं राष्ट्रभृद्धोमः क्रियते। ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्र

ह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदमृताषाहे ऋतधाम्नेऽग्नये गंधर्वाय॥१॥ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसो मुदो
नाम ताभ्यः स्वाहा। इदमोषधीभ्योऽप्सरोभ्यो मुद्भ्यः।२। संहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं संहि
ताय विश्वसाम्ने सूर्याय गंधर्वाय।३। संहितो विश्वसामा सूर्यो गंधर्वः। तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा। इदं म
रीचिभ्योऽप्सरोभ्य आयुभ्यः।४। सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं सुषुम्णाय सूर्यर
श्मये चंद्रमसे गंधर्वाय।५। सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा। इदं नक्षत्रे
भ्योऽप्सरोभ्यो भेकुरिभ्यः।६। इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदमिषिराय विश्वव्य
चसे वाताय गंधर्वाय।७। इषिरो विश्वव्यचा वातो गंधर्वः तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा। इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यः
।८। भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय।९। भुज्युः
सुपर्णो यज्ञो गंधर्वः। तस्य दक्षिणा अप्सरस स्तावा नाम ताभ्यः स्वाहा। इदं दक्षिणाभ्योऽप्सरोभ्यः स्तावाभ्यः।१०। प्रजापतिर्विश्व

कर्म्मा मनो गंधर्वः। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय। ११। प्रजापतिर्विश्वकर्मा
मनो गंधर्वः तस्य ऋक्सामान्यप्सरस एष्टयो नाम। ताभ्यः स्वाहा। इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यः। १२। अपरे त्वन्यथा मंत्रप्रयोगं
कुर्वंति तत्स्वरूपं। ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्। इति प्रथमः। १। तस्योषधयोऽप्सरसो
मुदो नाम ताभ्यः स्वाहेति द्वितीयः। एवं सर्वमंत्रेषु। अस्मिन्नपि पक्षे त्यागास्त एव॥ अथ जयाहोमः। चित्तं च स्वाहा। इदं चित्ताय। १। चित्ति
श्च स्वाहा। इदं चित्त्यै। २। आकूतं च स्वाहा। इदमाकूताय। ३। आकूतिश्च स्वाहा। इदमाकूत्यै। ४। विज्ञातं च स्वाहा। इदं विज्ञाताय। ५। विज्ञा
तिश्च स्वाहा। इदं विज्ञात्यै। ६। मनश्च स्वाहा। इदं मनसे। ७। शक्वरीश्च स्वाहा। इदं शक्वरीभ्यः। ८। दर्शश्च स्वाहा। इदं दर्शाय। ९। पौ
र्णमासं च स्वाहा। इदं पौर्णमासाय। १०। बृहच्च स्वाहा। इदं बृहते। ११। रथंतरं च स्वाहा। इदं रथंतराय। १२। प्रजापतिर्जयानिंद्राय वृष्णे प्रा
यच्छदुग्रः पृतनाज्येषु। तस्मै विशः समनमंत सर्वाः स उग्रः स विहव्यो बभूव स्वाहा। इदं प्रजापतये जयानिंद्राय। १३। ७॥ अथाभ्या
तानहोमः। अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या

ं स्वाहा। इदमग्नये भूतानामधिपतये। १। इंद्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्... इत्येवमादि स्वाहाकारांतो मंत्रः। इदमिंद्रा
य ज्येष्ठानामधिपतये। २। एवं समावत्वित्यादि द्विपक्षमाणेषु मंत्रेष्वनुषंगः। यमः पृथिव्या अधिपतिः। इदं यमाय पृथिव्या अधिपत
ये। ३। वायुरंतरिक्षस्याधिपतिः। इदं वायवेऽन्तरिक्षस्याधिपतये। ४। सूर्यो दिवोऽधिपतिः। इदं सूर्याय दिवोऽधिपतये। ५। चंद्रमा नक्ष
त्राणामधिपतिः। इदं चंद्रमसे नक्षत्राणामधिपतये। ६। बृहस्पतिर्ब्रह्मणोऽधिपतिः। इदं बृहस्पतये ब्रह्मणोऽधिपतये। ७। मित्रः
सत्यानामधिपतिः। इदं मित्राय सत्यानामधिपतये। ८। वरुणोऽपामधिपतिः। इदं वरुणायापामधिपतये। ९। समुद्रः स्रोत्यानामधिपतिः। इ
दं समुद्राय स्रोत्यानामधिपतये। १०। अन्नं साम्राज्यानामधिपति तन्मावत्वस्मिन्। इदमन्नाय साम्राज्यानामधिपतये। ११। सोम ओषधी
नामधिपतिः। इदं सोमायौषधीनामधिपतये। १२। सविता प्रसवानामधिपतिः। इदं सवित्रे प्रसवानामधिपतये। १३। रुद्रः पशूनामधिप
तिः। इदं रुद्राय पशूनामधिपतये। १४। उदकोपस्पर्शनं। त्वष्टा रूपाणामधिपतिः। इदं त्वष्ट्रे रूपाणामधिपतये। १५। विष्णुः पर्वतानाम
धिपतिः। इदं विष्णवे पर्वतानामधिपतये। १६। मरुतो गणानामधिपतयस्ते मावंत्वस्मिन्। इदं मरुद्भ्यो गणानामधिपतिभ्यः। १७। पितरः पि

तामहाः परेऽवरे ततास्तता महाः इह मावो त्वस्मिन् ब्रह्मण्लीस्या दसमानं। इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यः। १८। उदको
पस्पर्शनं। एते अष्टादश मंत्रा अभ्यातानसंज्ञकाः॥ छ॥ अथाग्निरैत्वित्येवमाद्याः पंचकृत्वो जुहोति। अग्निरैतु प्रथमो देवतानां सोऽस्यै
प्रजां मुंचतु मृत्युपाशात् तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा। इदमग्नये। १। इमामग्निस्त्रायतां गार्हपत्यः प्र
जामस्यै नयतु दीर्घमायुः अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिविबुध्यतामियं स्वाहा। इदमग्नये। २। स्वस्ति नो अग्ने दिवा
पृथिव्या विश्वानि धेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा। इदमग्नये। ३। सुगं नु पंथां प्रदिशन्न
एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः। अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा। इदं वैवस्वताय। ४। परं मृत्यविति ३। इदं मृ
त्यवे ३ उदकोपस्पर्शनं। प्राशनान्ते वा परं मृत्यविति होमः। अथ कुमार्या भ्राता शमीपलाशमिश्रान् लाजानंजलिना गृहीत्वा कुमार्यंजलावा
वपति। तान् कुमारी जुहोति तिष्ठती सव्यसहितेन दक्षिणहस्तेनांजलीना जुहोति। अर्यमणं देवमग्निमयक्षत स नो अर्यमा दे
वः प्रेतो मुंचतु मा पतेः स्वाहा। इत्यनेन मंत्रेण अंजलिकृतानां लाजानां तृतीयमंशं जुहोति। इदमर्यम्णे। इयं नार्युपब्रूते लाजानावपंतिका। आ

युष्मानस्तु मे पतिरेधंतां ज्ञातयो मम स्वाहा। इत्यनेन मंत्रेणांजलिस्थानां लाजानां मध्यं जुहोति। इदमग्नये। इमांल्लाजानावपाम्यग्नौ स
मृद्धिकरणं तव। मम तुभ्यं च संवननं तदग्निरनुमन्यतामियं स्वाहा। इत्यनेन मंत्रेणांजलिस्थितान् सर्वान् जुहोति। इदमग्नये। मंत्रमपि क
न्येव पठति। अथ कुमार्याः दक्षिणहस्तं गृभ्णाति मंत्रं वरः। गृभ्णामि ते सौभगत्वाय हस्तमित्यनेन मंत्रेण ३ पश्याम शरदः शतमिति ते
ना। गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः। अमोऽहमस्मि सा
त्वं सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं। तावेव विवहावहै सह रेतो दधावहै। प्रजां प्रजनयावहै पुत्रान् विंदावहै ब
हून्। ते संतु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमिति हस्तग्रहणमं
त्रः। अथैनां वधूं वरस्तूत्तरतोऽग्नेर्व्यवस्थितमश्मानं दक्षिणपादेनारोहयत्यारोहेममश्मानमित्यनेन मंत्रेण। कुमार्याः दक्षिणपादं स्वहस्ते
न गृहीत्वा अश्मोपरि करोति। स्थर्णः। तत्र वरस्य मंत्रपाठः। आरोहेममश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्यतोऽवबाधस्व पृतन्यतो
यतः। इति। अथ उक्तमंत्रया रूढायां कुमार्यां वरो गाथां गायति। सरस्वति प्रेदमव सुभगे वाजिनीवति। यां त्वा विश्वस्य भूतस्य प्रजायामस्या

यतः यस्यां भूतं सर्वमन्यवयस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यश इति अंतं। अथ प्रदक्षिणां परिक्रामतोः
वधूं तुभ्यमग्रे पर्यवहन् सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने प्रजया सहेति परस्य मंत्रपाठः। परिक्रमणस्यांते। एवं पुनरपि द्वि
यं। कुमार्या भ्राता शमीपलाशमिश्रां लाजान् अंजलिना अंजलावावपति। आरभ्य परिक्रमणांतं निर्विशेषं कर्म भवति। ततस्तृतीयकं
प्राग्ने तरं कुमार्या भ्राता शूर्पकोणाग्रेण सर्वान् लाजान् कुमार्यंजलावावपति। तान् तिष्ठती कुमारी जुहोति। भगाय स्वाहेत्यनेन मंत्रे
ण। इदं भगाय। ततः समाचारात् तूष्णीं चतुर्थं परिक्रमणं। नेत्रकथा इति। अथ प्रजापतये स्वाहेति प्राजापत्यहोमः अथैनां वधूमुदीचीं स
प्तपदानि प्रक्रामयति वरो वध्वा युक्तमायो मंत्रैः एकमिषे विष्णुस्त्वा नयत्विति वरेण एतेमंत्रैव पूरेकं पदं दद्यात् एवं द्वे ऊर्जे विष्णुस्त्वा नयत्वि
ति द्वितीयं। त्रीणि रायस्पोषाय विष्णुस्त्वानयत्विति तृतीयं। चत्वारि मायोभवाय विष्णुस्त्वा नयत्विति चतुर्थं। पंच पशुभ्यो विष्णुस्त्वा नयत्वि
ति पंचमं। षडृतुभ्यो विष्णुस्त्वा नयत्विति षष्ठं। सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सप्तमं। एवं पदक्रमं अनु आचार्य
सप्तपदानि दापयित्वा वरो वरं दक्षिणपादेन। अथ वरः स्कंधे स्थिताद् उदकुंभाद् उदकमादाय वधूमूर्धन्यभिषिंचेत् आपः शिवाः शिवतमाः शांताः
शांततमाः स्तास्ते कृण्वंतु भेषजमित्यनेन मंत्रेण। पुनस्तत एवं कुंभादुदकमादायापो हिष्ठेति तृचेन मूर्धन्यभिषिंचति वधूं। अथ वरः

अमुं पश्याति। सूर्यमुदीक्षस्वेति सापि वधू वरेण प्रेषिता सूर्यमुदीक्षते। तच्चक्षुरिति मंत्रेण पश्येम शरदः शतमित्यंतेन। अथ धाय
वमंत्रपाठः अथ वरो वध्वाः दक्षिणांसस्योपरि स्वहस्तं नीत्वा हृदयमालभते। मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमित्यनेन मंत्रेण। अथैनां वधूमभिमंत्रयते वरः। सुमंगलीरियं वधूरि
मां समेत पश्यत। सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतनेति मंत्रेण। अथाग्नेः प्रागुदग्वानडुहमागारं पूर्वकल्पितेऽनवाने
तस्मिंश्चानडुहे रोहिते चर्मण्यग्रीवमुत्तरलोमास्तीर्णे भवति। तदुपरि तां वधूं दृढपुरुषः क्षिप्त्वा पवेशयति। इह गावो निषीदंत्वि
हाश्वा इह पूरुषाः। इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदंत्वित्यनेन मंत्रेण। दृढपुरुषस्य मंत्रपाठः। स्वचर्मण्युपवेशने कश्चिज्ज्ञा
मातरं दृढपुरुषमाचष्टे। अपास्मिन्नपरस्मिन्ग्रामांते वा स्थितं तमुक्त्वा चर्मण्युपवेशयति वधूं। ततः स्विष्टकृद्धोमः अग्न
ये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। संस्रवप्राशनं। अत्र वा परस्तात् वा तिहोमः। ब्राह्मणाय पूर्णपात्रं ब्रह्मणोऽन्यतरस्य दानं।
स्वकीयायाचार्याय गोदानं करोति ब्राह्मणश्चेज्जामाता। अथ क्षत्रियश्चेद् ग्रामं दद्यात् आचार्याय। अथ वैश्यश्चेदश्वं। अ

अथ कश्चिद्यदि अभ्रातृकां कन्यामुद्वहेत्तदा तस्याः पित्रे रथमधिकं गवां शतं दत्त्वोद्वहेत् । एतेन पुत्रिकात्वं परिमुच्यते । ग्राम
प्रवचनं चात्र विवाहे कुर्यात् । श्मशाने च । विवाहश्मशानयोर्ग्रामं प्रमाणमिति श्रुतेः । ग्रामवृद्धेन स्वकुलवृद्धाः स्त्रियो वि
चार्यन्ते । नाहि पूर्वपुरुषैरनुष्ठीयमानं सदाचारं स्मरन्ति । द्विजान्वा द्विजान्स्त दृ अस्तमिते ध्रुवं दर्शयति वरो वध्वाः । अथ रा
त्रौ विवाहस्तदा वरदर्शनानन्तरमेवातो तत्र वरो ध्रुवमीक्षस्वेति वध्वाः । प्रेक्षे दत्वा । ध्रुवमसीत्यनेन मंत्रं पठति । तत्र मंत्रः । ध्रु
वमसि ध्रुवं त्वा पश्यामि । ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिः । मया पत्या प्रजावती सञ्जीव शरदः शतमित्यत स्मिन्मं
त्रचरणे त्वेव ध्रुवं ध्रुवमीक्षते । सायं दिन पश्य स्त्वं पश्यामी त्येवं अरुन्धतीं पश्यामीति । विवाहादारभ्य त्रिरात्रमक्षारालवणा
शिनौ स्यातां जायापती । अधःशय्यातां त्रिरात्रमेव । अधःशय्या शोभनत्वादिरुपहासार्थं नास्ति रजः शुद्ध्यर्थं । संवत्सर
न मिथुनमुपेयातां द्वादशरात्रं वा । षड्रात्रं वा । त्रिरात्रं वेति मिथुनकरणकालस्य पक्षत्रयं प्राप्तेषु कल्पः सर्वसंवत्सरादिपक्षे

११

त्को त्रिरात्रपक्ष एव पापीयमाराचतुर्थ्यां तत्र कालं कंवल्मर्यां रात्रावस्तिमिमनं कर्तव्यं । कृतश्चैतत् । चतुर्थीकर्मणः पक्षेन तत्र याज्ञवल्क्यमेव
नाद्यां पिसंवत्सरं तस्याः । विवाहे केचिद्वालाश्चतुर्थीकर्मणा ॥ छ ॥ अथोपासनस्य परिचरणमुच्यते । तत्रावसथ्याधानोत्तरका
लं तस्मिन्नेवाह्नि सायं प्रातरौपासनहोम [illegible] नित्ये मातृपूजापूर्वकं नान्दीमुखं श्राद्धं कर्तव्यमिति तत्तु मिते उपय
मनकुशादानं । समित्त्रयप्रक्षेपः [illegible] दीवतं दुलाः पूर्वं ततो धानानामन्यतमेन द्रव्येण हस्तेन होमः । अग्नये स्वाहा ।
इदमग्नये । प्रजापतये स्वाहा । इदं [illegible] प्रातस्तु पूर्णे सूर्याय स्वाहा । इदं सूर्याय । प्रजापतये स्वाहा । इदं प्रजा
गर्भकामश्चेत्स्त्री भवति तदा [illegible] सायं प्रातः पूर्वामाहुतिं जुहोति । पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ । पुमा
निन्द्रश्च सूर्यश्च पुमांसं वर्ततां मयि पुनः स्वाहेत्यनेन मंत्रेण । इदं मित्रावरुणाभ्यामश्विभ्यामिन्द्राय सूर्याय च । उ
त्तरामाहुतिं यजमानः स्वयं जुहोति । प्रजापतये स्वाहेति । एवमुपयमनकुशादानादि [illegible] सहमौपासनस्य परिचरणं

कर्त्तव्यौ॥ ७॥ ॥अथ पात्राहि प्रस्थितस्य राज्ञो रथाक्षभेदे नकस्य रथस्य त्व विमोक्षे अथवान्यस्यापि यानस्य विपर्यासे
चोपस्थस्यादिन्नावे अन्यस्यांगव्यापत्तौ स्त्रियाश्चो वाह्यतायाः प्रथमं गर्भग्रहणे यनेरथाक्षतस्तदादिप्रा किंचिदशोभनं नि
मित्तं भवति। एतेषु निमित्तेषु नैमित्तिकमुच्यते। पंचभूसंस्कारान्कृत्वा यदि राज्ञो निमित्तं तदा सेनाग्नेः स्थापनं यदि स्त्रि
यास्तदा वैवाहिकस्य। ततो ब्रह्मोपवेशनादि पर्युक्षणांतं कृत्वा आदित्यं तायरुर्जेमाथानोक्तार्वकुशार्क उका। दक्षिणास्थाप
नं धुर्यावनड्वाहौ। पर्युक्षणांते इहरातिरित्यामेहुतिदयंकुं होति। इह धृतिरिह स्वधृतिरिह रम इह रमस्व धृतिः स्वाहेति प्र
थमा। इदमग्नये। उपसृजं धरुणं मातरं धरुणो मातरं धयन् रायस्पोषमस्मासु दीधरत्स्वाहेति द्वितीया। इदमग्नये। ततो आघा
रावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृदिति। ततः प्राशनांते धुर्यावनड्वाहौ ब्राह्मणाय दद्यादिति।
ततो यानांतरोकल्पनं। मैत्रे द्वये नराज्ञस्तत्रोपवेशनं प्रतिक्षत्र इत्यारभ्य प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञ

इत्यंतः प्रथममंत्रः। आत्वाहार्षमित्यारभ्य मा त्वद्राष्ट्रमधिभ्रशदित्यंतो द्वितीयः। उक्ताहोमवेत्र दायानांतरमुपकल्प्य स्त्रियास्त
त्रोपवेशनमुक्ताभ्यां मंत्राभ्यां। ततो ब्राह्मणभोजनं। अक्षादिभेदे एषा प्रायश्चित्तिः॥ ७॥ अथ चतुर्थकर्मोच्यते। तत्र गृहाभ्यं
रतः पंचभूसंस्कारान्कृत्वा विवाहाग्नेः स्थापनं। ब्रह्मोपवेशनं। प्रणीताप्रस्थापनं। उत्तरतस्तद्द्पात्रकरणं। ततः प्रणी
ताप्रणयनादि आज्यभागांतमाधानवत्। आज्यभागानंतरमाज्येन पंचाहुतयो वक्ष्यमाणैर्मंत्रैः। अग्ने प्रायश्चित्ते त्वं देवानां
प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये। वायो प्रा
यश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा।
इदं वायवे। सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै
नाशय स्वाहा। इदं सूर्याय। चंद्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृह
घ्नी तनूस्तामस्यै नाशय स्वाहा। इदं चंद्राय। गंधर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपध

गामिया। स्येयशो घ्नीतन्नस्तामस्यैनाशाय स्वाहा। इदं गंधर्वाय। ततः स्थालीपाकेन प्रजापतये स्वाहेति। इदं प्रजापतये। अग्ने
प्रायश्चित्ते इत्यादि प्राजापत्यांतानां षडाहुतीनां उदपात्रे संस्रवप्राशनं। स्विष्टकृतोपि केचिदिच्छंति। अन्यासामाहुती
नां पात्रांतरे संस्रवप्राशनं। ततः स्विष्टकृत् स्थालीपाकेन। अग्नये स्विष्टकृते स्वाहेति। इदमग्नये स्विष्टकृते इति। ततः
आज्येन महाव्याहृत्यादि प्राजापत्यांता नवाहुतयः। ततः पात्रांतरे संस्रवास्तेषां प्राशनं। पूर्णपात्रं वरयोरन्यतरस्य ब्राह्म
णदानं। ततः उदपात्रं उदकुंभाद्यवधूमूर्ध्नि न्यासिंचति। या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदिता तनूर्जारघ्नी
तां तस्यां करोमि सा जीर्य त्वं मया सह अमुके इत्यनेन मंत्रेण। अथैनां वधूं स्थालीपाकं प्राशयति वरः। प्राणैस्ते प्राणा

१७

न् संदधाम्यस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति अनेन मंत्रेण। वरस्यैव मंत्रपाठः॥ ॥ इति विवाहः समा
प्तः॥ ७॥ अथर्तुकाले आयाते पुण्याहमातृपूजापूर्वकं नांदीमुखं श्राद्धं कृत्वा रात्रावभिगमनं कुर्यात्। अभिगम
नात् प्राक् दक्षिणांसस्योपरि हस्तं नीत्वा वक्ष्यमाणं हृदयमालभते पतिः। यत्ते सुसीमे हृदयं दिवि चंद्रमसि श्रितं। वेदा

हं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतमित्यनेन मंत्रेण। श्राद्धवर्जमेवं ऋतावृता
वभिगमनं। यथाकामं वा॥ ८॥ ॥ अथ पक्षादिकर्मोच्यते। तत्र प्रथमप्रयोगे मातृपूजापूर्वकं श्राद्धं कृत्वा ब्रह्मोपवेश
नाद्याज्यभागांतमाधानवत्। विशेषस्तूच्यते। तंडुलानंतरं वैश्वदेवचरुः सिद्धः स्वासादने। प्रोक्षते च। आज्यभा
गानंतरं दर्शपूर्णमासदेवताभ्यो होमः स्थालीपाकेन। तत्र पौर्णमासे। अग्नये स्वाहा। इदमग्नये। अग्नीषोमाभ्यां
स्वाहा। इदमग्नीषोमाभ्यां न मम। पुनः अग्नीषोमाभ्यां स्वाहा। इदमग्नीषोमाभ्यां न मम। दर्शे तु। अग्नये स्वाहा। इ
दमग्नये। विष्णवे स्वाहा। इदं विष्णवे। अग्नीषोमौ वायु विष्णुस्थाने। इंद्राग्निभ्यां स्वाहा। इदमिंद्राग्निभ्यां। सन्नय
तोपींद्राग्निभ्यामेव नेंद्रायेति। ततो ब्रह्मणे स्वाहा। इदं ब्रह्मणे। प्रजापतये स्वाहा। इदं प्रजापतये। विश्वेभ्यो देवेभ्यः
स्वाहा। इदं विश्वेभ्यो देवेभ्यः। द्यावापृथिवीभ्यां स्वाहा। इदं द्यावापृथिवीभ्यां। एताः सप्ताहुतयः स्थालीपाकेन। ततः स्था

लीपाकेनैवोत्तरतो बलिहरणं स्रुवेणैव॥ विश्वेभ्यो देवेभ्यो नमः। इदं विश्वेभ्यो देवेभ्यः। भूतगृह्येभ्यो नमः। इदं भूतगृह्येभ्यः।
आकाशाय नमः। इदमाकाशाय। एवं बलिहरणं कृत्वा वैश्वदेवाद्वरोगाहुतित्रयं जुहोति। अग्नये स्वाहा। इदमग्नये।
प्रजापतये स्वाहा। इदं प्रजापतये। विश्वेभ्यो देवेभ्यः स्वाहा। स्पष्टास्त्यागाः॥ अथ वरो रुत्तरार्द्धौ वैश्वदेवान्नात्स्विष्टकृतं।
आग्नये स्विष्टकृते स्वाहेति। ततो महाव्याहृत्यादि प्राजापत्यांता नवाहुतयः। संस्रवप्राशनं। पूर्णपात्रं वरयोरन्यतरस्य
ब्राह्मणदानं। ततो बलिहरणं शालायाः बहिः स्थालीपाकान्नस्रुवेण। नमः श्रियै। नमः पुंसे वयसे वयसे। नमः शु
क्लाय कृष्णदंताय पापीनांपतये। नमो ये मे प्रजामुपलोभयंति ग्रामे वसंत उत वारण्ये तेभ्यः। नमोस्तु बलिमेभ्यो हरामि
स्वस्ति मेस्तु प्रजां मे ददतु। एतत्र पंचमंत्रा आदौ इदंस्वाब युक्ताः नमस्कारवर्जितास्त्यागः। ततः स्थालीपाकशेषस्य प्र
णीतोदकेन प्लावनं। ततो ब्राह्मणभोजनं॥ छ॥ ॥ सायंदिने नैन धारयेत्। तदा गर्भधारणार्थं प्रयोग उच्यते। यस्मि
न्नहनि पुष्यनक्षत्रं भवति। ततः पूर्वस्मिन्नहन्युपवासं कृत्वा उपोषितो। भर्त्ता पुष्यादिने सिंहल्याः श्वेतपुष्प्याः मूलमुत्पाट्य

कन्नु स्नातायाश्चतुर्थेहनि रात्रौ तन्मूलमुदकेन पेषयित्वा दक्षिणे नासापुटे नस्यं ददाति मंत्रेण। इयमोषधी त्रायमाणा सहमाना
सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभं। मिश्रितेन मंत्रेण। भर्त्तुरेव मंत्रपाठः। सिंहली हि कंटकारिकोच्यते॥ छ॥ ॥अ
थ पुंसवनमुच्यते॥ तत्र गर्भाधानात्प्रभृति तृतीये मासे द्वितीये तृतीये वा यस्मिन्नहनि पुंसा नक्षत्रेण पुष्यादिना चंद्रमा युज्यते तत
स्मिन्नहनि स्त्रियमुपवासं कारयेत्। ततो मातृपूजापूर्वकं श्राद्धं कृत्वा। ततस्तां स्नापयित्वा अहतवाससी परिधाप्य। ततो रा
त्रौ न्यग्रोधावरोहशुंग्या यो वेष्णु गांश्चोदकेन पिष्ट्वा नासिकाया दक्षिणपुटे आसिंचति मंत्रौ हिरण्यगर्भोद्भिः संभृत इत्ये
ताभ्यां मंत्राभ्यां॥ न्यग्रोधावरोहशुंग्यभावे कुशकंटकं पिष्यमाणे कुशकंटकस्य सोमांशुरोम्मितं मध्ये प्रक्षिप्य पेषणमि
च्छया। स यदि कामयेत वीर्यवान्स्यादयं गर्भ इति तदा तस्याः स्त्रियाः उदरमालभ्य उपस्थं कृत्वा सुपर्णोसीत्यादिना दिवं गच्छ स्वः
पतेत्येतदंतेन तं गर्भमभिमंत्रयते पिता॥ छ॥ ॥अथ सीमंतोन्नयनमुच्यते॥ तत्र पुंनक्षत्रे मातृपूजापूर्वकं श्राद्धं कृत्वा
बहिः शालायां पंचभूसंस्कारान्कृत्वा लौकिकाग्नेः स्थापनं॥ ततो ब्रह्मोपवेशनादाज्यभागांतं विशेषः। तिलमुद्गमिश्रभक्त

भवति। तत्र पात्रासादने। आज्यानंतरं तंडुलं तिलमुद्गानां माषादीनां पक्वस्थालीयानि। [illegible] उदुंबरफलान्ये

कस्तबकनिबद्धानि। त्रयो दर्भपिंजूलाः। त्र्येणी शलली। वीरतरमयः शंकुः। वीरतरशंकु[illegible] कोऽन्यतरः कश्चित्। अ

[illegible]कुर्यादन्ये। पूर्णपात्रं। वीणागाथिनौ चेति। आज्यनिर्वपणानंतरं स्थालीपात्रे मुद्गप्रक्षेपः कृसराधिश्रयणं। इध्म

तमुद्गतिलतंडुलप्रक्षेपः। ततः पर्यग्निकरणाद्याज्यभागांतं। आज्यभागानंतरं स्थालीपाकेन प्रजापतये स्वाहेति होमः।

इदं प्रजापतये। अथ स्थालीपाकेनोत्तरार्धात्स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यांतान् नवाहुतयः। ततः संस्रवप्राश

नं। पूर्णपात्रवरयोरन्यतरस्य ब्राह्मणे दानं। ततः पश्चादग्नेर्भद्रपीठे संस्थाप्य स्त्रियं स्नापयित्वा। अहते वाससी परिधाप्य मृदुपी

ठे उपवेशयेत्। ततो युग्मेन सटालुग्रथितेनौदुंबरेण त्रिभिर्दर्भपिंजूलैस्त्र्येण्या शलल्या वीरतरशंकुना पूर्णचात्रेण च एतैः

सर्वैः शललीकृतैः स्त्रियाः सीमंतं मूर्ध्नि विनयति। भूर्भुवः स्वर्विनयामीत्यनेन मंत्रेण। इति महाव्याहृतिभिर्वा सीमंतं विन

यनं। भूर्विनयामि। भुवर्विनयामि। स्वर्विनयामि। ततो वीणागाथिनौ राजानं संगायेतामिति। तत्र औदुंबरादि[illegible]

कवेण्या बध्नाति। अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेत्यनेन मंत्रेण। ततो वीणागाथिनौ राजानं संगायेतामिति प्रैषः। स्योना

र्यत्वो वीरतरो वा मीयते। तस्मिन्पक्षे वीरतरस्य नाम गृहीत्वा वीणागाथिनौ अमुकं संगायेतामित्येवमेव प्रैषः। सोम ए

वनो राजेमा मानुषीः प्रजाः। अविमुक्तचक्र आसीरं तीरे तुभ्यमसाविति तया गाथया वीणागाथिनोर्गानं। असौ

स्थाने समीपावस्थितायाः नद्याः नामग्रहणं गंगायमुनाद्युपेत्येवमादि प्रथमांतं नामग्रहणं स्वप्रवकरोति। ततो ब्राह्म

णभोजनं॥ ॥ ७॥ प्रसवश्च भवती स्त्रियमद्भिरभ्युक्षेत् [illegible] एजतु दशमास्य इत्यनेन मंत्रेण। स्व जरायुणा सहेत्यंतेन

अथावरावपतनमंत्रं जपति स्त्रीसमीपे। अवैतु पृश्नि शेवलं शुने जराय्वत्तवे नैव मांसेन पीवरी न कस्मिंश्चनायत

नमवजरायु पद्यतामिति। यदि कुमारो जायते तदा नालच्छेदात्पूर्वमेवाभ्याधाय कृत्वा अच्छिन्ने नाले मेधाजननायुष्ये करो

ति। तत्र मेधाजननं तावत्। अनामिकया सुवर्णांतर्हितया मधुघृते [struck through] एकीकृत्य घृतं वा केवलं कुमारं प्रा

शयति। भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीत्यनेन मंत्रेण स

क्षत्रारायति॥ अथायुष्यकरणं। तत्र कुमारस्य नाभिसमीपे दक्षिणकर्णसमीपे वाग्निरायुष्मानित्यादि च पञ्च मान्त्रा
मंत्राञ्जपति। अग्निरायुष्मान्स वनस्पतीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि। सोम आयुष्मान्स ओषधी
भिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि। ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मन्तं करोमि। देवा आयुष्मन्तस्ते
मृतेनायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। पितर
आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तेन त्वायुषा
युष्मन्तं करोमि। समुद्र आयुष्मान्स स्रवन्तीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि। इत्येतावत्पर्यन्तं अग्निरायुष्मा
नित्यावृत्त्या त्रिर्जपति। ततः त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं। यद्देवानां त्र्यायुषं तन्नो अस्तु त्र्यायुषमित्येतद
पि त्रिर्जपति। स यदि कामयेत कुमारः सर्वमायुरियादिति तदा कुमारं वात्सप्रेणाभिमृशेत्। दिवस्परीत्यादि अनुवा
कस्य सहस्रं विपश्यन्‌मितिन्न माना बजं गोमन्त मुशिजो विवव्रुरित्यन्तो वात्सप्रः। ततः कुमारस्य प्रतिदिशं ब्राह्मणपञ्चकस्था

पनं। इममनु प्राणितेति प्रेषः। ततः पूर्वो ब्राह्मणो ब्रूयात् प्राणेति। व्यानेति दक्षिणः। अपानेत्यपरः। उदानेत्युत्तरः। समा
नेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्। अविद्यमानेषु ब्राह्मणेषु स्वयमेव करोति परिक्रम्य परिक्रम्य। स्वयं पक्षे प्रेषा
भावः। यस्मिन्देशे कुमारो जातो भवति तं देशमभिमंत्रयते। वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितं। वेदाहं तन्मां तद्विद्यात् पश्येम शरदः श
तं जीवेम शरदः शतं शृणुयाम शरदः शतमित्यनेन मंत्रेण। अथैनं कुमारमभिमृशति अश्मा भव परशुर्भव हिरण्यमस्रुतं भव। आत्मा वै पुत्र
नामासि स जीव शरदः शतमित्यनेन मंत्रेण। अथास्य कुमारस्य मातरमभिमंत्रयते। इडासि मैत्रावरुणी वीरे वीरमजीजनथाः। सा त्वं वीर
वती भव यास्मान्वीरवतोऽकरदित्यनेन मंत्रेण। अथास्य मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छति इमं स्तनमित्यनया। ततो वामं स्तनं
प्रक्षाल्य प्रयच्छति यस्ते स्तनः शशय इत्येताभ्यां मंत्राभ्यां। कुमारस्य शिरसः प्रान्ते उदपात्रं निदधाति आपो देवेषु जाग्रथ यथा देवेषु जाग्र
थ। एवमस्यां सूतिकायां सपुत्रिकायां जाग्रथेत्यनेन मंत्रेण। उदपात्रं स्थापितमेव तिष्ठति आ दशाहात्। ततः पुत्र जन्मनि रक्षार्थं
सूतिकागृहद्वारदेशे सूतिकाग्नेः स्थापनं। अतः प्रभृति सायंप्रातः सर्षपफलीकरणमिश्रान्सर्षपानग्नौ जुहोति हस्तेन। शंडो

मर्कोपवीरः शौण्डिकेय उलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहेत्यनेन मंत्रेण प्रथमाहुतिः। आलिखन्ननिमिषः किंवदंत उप
श्रुतिः। हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हंत्री मुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेत्यनेन मंत्रेण द्वितीयाहुतिः। इदं देवाः सुकोसवा
हाकारवर्जितो त्यागो। यदि कुमारग्रहो बालमुपद्रवेत् तदा तं बालं जालेन प्रच्छाद्योत्तरीयेण वाससा वा अंकमाधाय तं बालं पिता जप
ति। कूर्कुरः सुकूर्कुरः कूर्कुरो बालबंधनः। चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं। यत्ते देवा वरमददुः स त्वं कुमारमेव
वा वृणीथाः। चेचेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं। यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ। चेचे
च्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं। इति पितुर्जपः। न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र
चाभिमृशामसीत्यनेन मंत्रेणाभिमृशेत् कुमारं पिता॥ ॥छ॥ दशम्यामुत्थाप्य एकादशे ह्नि मातृपूजापूर्वकं श्राद्धं कृत्वा
श्राद्धव्यतिरिक्तेन आसनत्रयेणोपविश्य पिता नाम करोतीति यथोक्तं॥ ॥छ॥ चतुर्थे मासि निष्क्रमणिका॥ तत्र मातृपूजापूर्वकं ॥१७
नांदीश्राद्धं कृत्वा सूर्यमुदीक्षयति कुमारं पिता तच्चक्षुरित्यनेन मंत्रेण भूयश्च शरदः शतादित्यनेन॥ ॥छ॥ अथ चासं कृत्वा उप

गृहोपस्थानं हुत्वा मा बिभेत्यनेन मंत्रेण। उपथो अन्नस्य कीलालं उपहूतो गृहे पुनरस्वेत इत्यनेन केचित्। षष्ठे मासि वस्तिप्रवेशनमपि
छंति। तत्र कारणानसूत्रिं नामिति। पुत्रं दृष्ट्वा जपति। अंगादंगात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः
शतमित्यनेन मंत्रेण। अथास्य पुत्रस्य मूर्धानमवजिघ्रति। प्रजापतेष्ट्वा हिंकारेणावजिघ्रामि सहस्रायुषा अमुकशर्मन् जीव शरदः
शतमित्यनेन मंत्रेण। पुनर्गवां त्वा हिंकारेणेत्यनेन मंत्रेण त्रिः शिरोवघ्राति। सकृन्मंत्रेण द्विस्तूष्णीं। तत्र मंत्रः। गवां त्वा हिंकारेणा
वजिघ्रामि सहस्रायुषा अमुकशर्मन् जीव शरदः शतमिति। ततः पुत्रस्य कर्णं जपति। अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्व दक्षिण
वारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीरां छश्वत इंद्र शिप्रिन्निति दक्षिणे कर्णे जपेन्मंत्रं। इन्द्र श्रेष्ठानि द्रविणानि
धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नामिति वामकर्णे जपमंत्रः। स्त्रियास्तु
तूष्णीं विघ्राणमात्रं तु होमः॥ ॥छ॥ षष्ठे मास्यन्नप्राशनं॥ तत्र मातृपूजापूर्वकं माभ्युदयिकं श्राद्धं कृत्वा पंचभूसंस्कारान् कृत्वा
लौकिकाग्निस्थापनं। ततो ब्रह्मोपवेशनाद्याज्यभागांते। आज्यभागानंतरं माज्येनाहुतिद्वयं। तत्रादौ देवीं वाचमजनयंत देवास्तां

विश्वरूपाः पशवो वदंति। सा नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा इति प्रथमाहुतिः। इदं वाचे। देवीं वाचमजनयंत देवाः
तुपसुष्टुतैतु। वाजो नो अद्य प्रसुवाति दानमित्येताभ्यामृग्भ्यां द्वितीयाहुतिः। इदं वाचे वाजाय च। ततः स्थालीपाकेनाहुतिचतुष्टयं प्रा
णेनान्नमशीय स्वाहा। इदं प्राणाय। अपानेन गंधानशीय स्वाहा। इदमपानाय। चक्षुषा रूपाण्यशीय स्वाहा। इदं चक्षुषे। श्रोत्रेण
यशोऽशीय स्वाहा। इदं श्रोत्राय। ततः स्थालीपाकेन स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यांता नवाहुतयः। ततः संस्रवप्राशनं। पू
र्णपात्रवरयोरन्यतरस्य ब्रह्मणे दानं। ततः सर्वान्रसान् कटुलवणतिक्तकषायमधुराम्लान् सर्वान्नानि च एकत्र कृत्वा नि यथासंभ
वमेकस्मिन्पात्रे कृत्वा समंत्रं दद्यात् प्राशयेत्कुमारं तूष्णीं। हंत इति वा मंत्रेण प्राशयेत्। स यदि कामयेत कुमारो वाग्मी स्यात्तदा भारद्वा
ज्या मांसं प्राशयेत्। स यदि कामयेत कुमारोऽन्नादः स्यात्तदा कपिंजलमांसं प्राशयेत्। जवनकामो मत्स्यमांसं। आयुःकामः कृकषाया
मांसं। ब्रह्मवर्चसकामः आटीमांसं। सर्वकामः सर्वाणि मांसानि प्राशयेत्। अन्नपर्यायो यथा। अन्नपर्यायाः। अन्नपरिपाक॥
यथा सर्वान्नानेकीकृत्य प्राशयत्येवं। सर्वकामः सर्वमांसानेकीकृत्य प्राशयेत्। ततो ब्राह्मणभोजनं॥ इति दीक्षितवासुदेवी
श्री

तायामन्नप्राशनपद्धतौ प्रथमकांडे समाप्ता॥ ॥ ७॥ नित्ये नैमित्तिके काम्ये ऽपात्तिन्यारिक एव वा। ऽपावसथ्यो विधातव्यो मुख्ये
कानुप्रस्तरे॥ ॥ अथ चूडाकरणं कथ्यते। तत्र सांवत्सरिकस्य चूडाकरणं। संवत्सरे व्यतीते चूडाकरणं कर्तव्यमि
त्यर्थः। तृतीये वा संवत्सरे ऽपत्यावशिष्टं चूडाकर्म कर्तव्यं। यथामंगलं सर्वेषां वा चूडाकरणं कर्तव्यं। यस्य कुले सांवत्सरिकस्य चूडाक
रणं क्रियते तस्य तस्य सांवत्सरिकस्यैव कर्तव्यं। यस्य तृतीयेऽब्दे प्रतिहते चूडाकरणं तस्य कुले तृतीय एव। प्रतिहते चूडाकरणं क
र्तव्यमिति। यस्य कुले नियमो नास्ति तस्य याद्दच्छिको विकल्पः। अपरे तु यथामंगलं नक्षत्र तरोक्त कालांतरमप्युक्तं भाव
यंति। षोडशवर्षस्य केशांतो भवति। सप्तदशवर्षे इत्यर्थः। कालो विहितः। इदानीं कर्माभिधीयते। मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृ
त्वा ब्राह्मणान् त्रयं भोजनं। ततो बहिः शालायां पंचभूसंस्कारान्कृत्वा लौकिकाग्निस्थापनं। ततो माता कुमारमादाय स्नापयि
त्वाऽहते वाससी परिधाप्यांके कृत्वा कुमारं पश्चादग्नेरुपविशति। ततो ब्रह्मोपवेशनाद्याज्यभागांते विशेषः। नात्र चरुः। आसादना
नंतरमुपकल्पनीयानि। शीतोदकं उष्णोदकं। नवनीतपिंडं घृतपिंडं दधिपिंडं वा नामन्यतमं त्रेणी शललीः। सप्तविंशति कुशतरुणा

नि। ताम्रपरिप्लुतञ्चायसं क्षुरः। पात्रं तु हे गोमयपिंडं। नापितश्चेति। आज्यभागानंतरं महाव्याहृत्यादि प्राजापत्यांतान
वाहुतयः। ततः स्विष्टकृत्। ततः संस्रवप्राशनं॥ ततः शूर्पपात्रवरयोरन्यतरस्य ब्रह्मणे दानं। ततः शीतास्वुष्णा अप आसिं
चति। उष्णेन वाय उदकेनेह्यदिते केशान्वपेत्यनेन मंत्रेण। केशांते मंत्रविशेषः। उष्णेन वाय उदकेनेह्यदिते केशश्मश्रु वपेति।
अथोष्णोदकमिश्रितास्वशुनवनीतपिंडं वा घृतपिंडं वा दधिपिंडं वा घास्यति। अतः प्रभृत्यनेनैवोदकेनोंदनं कार्यं सर्वत्र। तत
उदकमादाय दक्षिणं गोदानमुंदति। सवित्रा प्रसूता दैव्य आप उन्दंतु ते तनूं। दीर्घायुत्वाय वर्चस इत्यनेन मंत्रेण। ततस्त्र्येण्या
शलल्या केशान्विनीय त्रीणि कुशतरुणान्यंतर्दधात्योषधे त्रायस्वेत्यनेन मंत्रेण। ततस्ताम्रपरिप्लुतमायसं क्षुरमादत्ते।
शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिंसीरित्यनेन मंत्रेण। कुशतरुणांतर्हितेषु केशेषु क्षुरमभिनिदधाति। निवर्त
याम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेत्यनेन मंत्रेण। येनावपत्सविता क्षुरेण सोमस्य राज्ञो
वरुणस्य विद्वान्। तेन ब्रह्माणो वपतेदमस्यायुष्मांजरदष्टिर्यथासदित्यनेन मंत्रेण सकेशानि कुशतरुणानि प्रच्छिद्यानडुहे

१२

गोमयपिंडे उत्तरतो ध्रियमाणे प्रक्षिपति। ततस्तस्मिन्नेव गोदाने एवमेवापरं वारद्वयं कृत्वा कर्म कर्तव्यं। तत्रोदकमादायोंदनं। त्र्येण्या श
लल्या विनयनं। कुशतरुणत्रयांतर्धानं। क्षुरमात्रमेव कुशतरुणांतर्हितेषु केशेषु क्षुराभिनिधानं। सकेशानां कुशतरुणानां छे
प दनं। गोमयपिंडे प्रासनं। एवमुक्तप्रकारेण दक्षिणगोदाने वारत्रयं कृत्वा। ततः पश्चिमोत्तरगोदानयोरप्येवमेव कर्म करोति।
क्षुरादाने तु मंत्रेणापुनर्नवति। मंत्रेण सकृज्जपितेनत्वात्। पश्चिमगोदाने। त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं। यद्देवानां
त्र्यायुषं तन्मे अस्तु त्र्यायुषमित्यनेन मंत्रेणोंदनं। उत्तरगोदाने। येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यं। तेन ते वपामि ब्र
ह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इत्यनेन मंत्रेण छेदनं। अन्यत्सर्वं पूर्वोक्तादि गोमयपिंडप्रासनांतं समानं। ततः त्रिः
क्षुरेण शिरः प्रदक्षिणं परिहरति। यत्क्षुरेण मज्जयता सुपेशसा वप्ता वा वपति केशान्। छिंधि शिरो मास्यायुः प्रमोषीरित्यने
न मंत्रेण। सकृन्मंत्रेण परिहरणं द्विस्तूष्णीं। केशांते तु मुखस्यापि शिरसः स्त्रिः प्रदक्षिणं परिहरणं। मंत्रे विशेषः। मास्या
युः प्रमोषीर्मुखमिति। ततस्ताभिरेवाद्भिः शिरसोंदनं। नापिताय क्षुरसमर्पणं। अक्षण्वन्परिवप इत्यनेन मंत्रेण। यथा मंगलं

केशान्तोपकरणमित्यस्यायमर्थः। कुलव्यवस्थया शिखास्थापनं। केचित्पंचशिखाः केचित्त्रिशिखाः केचिदेकशिखाः। यस्यस्व
कुले यथास्ति तस्य तस्यैव शिखास्थापनं। ततः सर्वान्केशान् गोमयपिंडं कृत्वा वा गोमयपिंडे वस्त्रादिवेष्टने नागुलतले कृत्वा
गोष्ठे स्थापयेत्। अथवा पल्वले अल्पोदके। यद्वा उदकसमीपे व्रीहिकान्ते स्थापयेत्। ततश्चूडाकरणकर्त्ता स्वाचार्याय वरं ददाति। के
शान्ते तु स्वाचार्याय गां ददाति। सर्वेषु संस्कारकर्मसु आधानादिषु विवाहान्तेषु असगतिः पितैव कर्त्ता। तदभावेऽन्यः। केशान्ते संवत्सरं ब्रह्म
चर्यं। द्वादशरात्रं वा। षड्रात्रं वा। त्रिरात्रं वा। एते चत्वारो ब्रह्मचर्यविकल्पाः पूर्वपूर्वाशक्त्या। केशान्तोत्तरकालमवपनं च यावज्जीवं। स्त्री
स्त्रीयं वपनव्यतिरेकेण॥ ॥ ॥अष्टवर्षं ब्राह्मणमुपनयेत्॥ गर्भाष्टमे वा एकादशवर्षं राज
न्यमुपनयेत्। द्वादशवर्षं वैश्यमुपनयेत्। यथामंगलं वा सर्वेषामुपनयनं कार्यं। यथामंगलशब्देन स्वस्वेतरोक्ते पंचव
र्षादिकालमभिधानं। अथ पुण्येऽहनि मातृपूजापूर्वकं नान्दीमुखश्राद्धं कृत्वा कुमारस्य वपनं। ततो ब्राह्मणत्रयभोजनं। कुमा
रस्य भोजनं। बहिःशालायां पंचभूसंस्कारान्कृत्वा लौकिकाग्नेः स्थापनं। कुमारस्य पर्युप्तशिरसोऽलंकृतस्याचार्यसमीपानयनं

२०

कुमारो

आचार्यकुलेषु आनीतस्य कुमारस्य पश्चादग्नेरवस्थापनं। ब्रह्मचर्यमागामिति ब्रूहीत्याचार्यो वदति कुमारं प्रति। ब्रह्मचर्यमा
गामिति ब्रूयात्। ब्रह्मचार्यसानीति ब्रूहीत्याचार्यो वदति। ब्रह्मचार्यसानीति कुमारः माणवकः। अथैनं माणवकं माणवकमाचा
र्यो वासः परिधापयति। येन बृहस्पतेर्वासः पर्यदधादमृतं। येन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे इत्यनेन मं
त्रेण। आचार्यस्यैव मंत्रपाठः। वासांसि कार्पासक्षौमाविकानि ब्राह्मणक्षत्रियविशां यथासंख्यं। तत आचार्यो माणवकस्य मेखलां
बध्नाति। इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्। प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखले
यमिति। माणवकस्य मंत्रपाठो मेखलाबंधने। युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय
उन्नयंति स्वाध्यो मनसा देवयंतं इत्यनेन मंत्रेण वा मेखलाबंधनं। तूष्णीं वा मेखलाबंधनं। ततो यज्ञोपवीतपरिधानं। यज्ञो
पवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इत्यनेन मंत्रेण माण
वकस्य मंत्रपाठः। आचमनं माणवकस्य। ऐणेयस्याजिनस्योत्तरीयकरणं तूष्णीं माणवकस्य। तत आचार्यो दंडं प्रयच्छ

त माणवकः प्रतिगृह्णाति। यो मे दण्डः परापतद्वैहायसोऽधि भूम्यां। तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेत्यनेन मंत्रेणा [illegible]
दण्डं प्रतिगृह्णामि इति। तत आचार्यः स्वकीयमंजलिमद्भिः पूरयित्वा ताभिरद्भिरंजलिस्थाभिरद्भिर्माणवकस्यांजलिं पूरयित्वाप
हिष्ठेति तिसृभिर्ऋग्भिः। आचार्यस्य मंत्रपाठः। तत आचार्यो माणवकं प्रेषयति। सूर्यमुदीक्षस्वेति। प्रेषितो माणवकः सू
र्यमुदीक्षते। तच्चक्षुरित्यनेन मंत्रेण भूयश्च शरदः शतादित्यंतेन। दक्षिणांसमधि हस्तं नीत्वा कुमारस्य हृदयालंभं करोति
त्याचार्यः। मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु। मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमित्यने
न मंत्रेण। आचार्यस्य मंत्रपाठः। कुमारस्य दक्षिणहस्तं गृहीत्वा को नामासीत्याचार्य आह। एवं पृष्टः कुमारः प्रत्याह अमुकश
र्मा अहं भो इति। पुनराचार्यः पृच्छति माणवकं। कस्य ब्रह्मचार्यसीति। तव [illegible] व्यमाने कुमारेण। इन्द्रस्य ब्रह्मचार्यस्यग्नि
राचार्यस्तवाहमाचार्यस्तवामुकशर्मन्निति इत्याचार्यः पठेत्। अथैनं कुमारं भूतेभ्यः परिददात्याचार्यः। प्रजापतये त्वा परिददामि
देवाय त्वा सवित्रे परिददाम्यद्भ्यः त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा परिददामि दे

२१

भ्यस्त्वा परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इत्यनेन मंत्रेण। प्रदक्षिणमग्निं परीत्योपविशत्याचार्यस्योत्तरतो माण
वकः। ततो ब्रह्मोपवेशनादि पर्युक्षणांते। आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृत्मेता [illegible] चतुर्द
शाहुतयः। ततः संस्रवप्राशनं। पूर्णपात्रवरयोरन्यतमं ब्रह्मणे दानं। अथैनं ब्रह्मचारिणमाचार्यः समनुशास्ति। ब्रह्म
चार्यसीत्याचार्यो वदति। भवामीति ब्रह्मचारी। अपोऽशानेत्याचार्यो वदति। अश्नानीति ब्रह्मचारी। कर्म कुर्वित्याचार्यो व
दति। करवाणीति ब्रह्मचारी। मा दिवा सुषुप्था इत्याचार्यो वदति। न स्वपामीति ब्रह्मचारी। वाचं यच्छेत्याचार्यो वदति। य
च्छानीति ब्रह्मचारी। समिधमाधेहीत्याचार्यो वदति। आदधानीति ब्रह्मचारी। अपोऽशानेत्याचार्यो वदति। अश्नानीति
ब्रह्मचारी॥ ०॥ अथास्मै ब्रह्मणे सावित्रीमन्वाहाचार्यः। कथं भूताय ब्रह्मचारिण इत्यपेक्षायां। उत्तरतोऽग्नेः [illegible] कृताय
प्रत्यङ्मुखायोपविष्टाय पादोपसंग्रहणपूर्वकमुपसन्नायाचार्यं समीक्षमाणाय स्वयमपि समीक्षिताय नाम ब्रूयात्। [illegible]
कथं। ओंकारव्याहृतिपूर्वकं प्रथमं पच्छः। द्वितीयमर्धर्चशः। तृतीयं सर्वां सह पठन्नाचार्यो ब्रूयात्। दक्षिणतोऽग्नेस्तिष्ठते

ऽपासीनाय वा॥ दक्षिणात एवैके सावित्रीमन्वाहुः। संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा। तेषां कालानामन्यत-
मे क्षत्रियवैश्ययोः सावित्रीं ब्रूयादन्वार्थं। तत्र त्रिष्टुभं सावित्रीं राजन्यस्य ब्रूयात्। जगतीं सावित्रीं वैश्यस्य ब्रूयात्। सर्वे-
षां वा ब्राह्मणक्षत्रियवैश्यानां गायत्रीमेव सावित्रीं ब्रूयात्। अत्रावसरे ब्रह्मचारिणः समिदाधानं॥ ॥ तत्र प्रथमं तावद् दक्षिण-
हस्तेनाग्नेः संधुक्षणं। संधुक्षणमिंधनप्रक्षेपो वक्ष्यमाणैः पंचभिर्मंत्रैः। अग्ने सुश्रवः सुश्रवसं मा कुरु। १ यथा त्वम-
ग्ने सुश्रवः सुश्रवा असि। २ एवं मां सुश्रवः सौश्रवसं कुरु। ३ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि। एवमहं मनुष्या-
णां वेदस्य निधिपो भूयासमित्येतैः पंचभिर्मंत्रैः प्रतिमंत्रमिंधनप्रक्षेपः। ततः प्रदक्षिणमग्निं पर्युक्ष्योत्थाय समि-
धमादधाति। अग्नये समिधमाहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा
प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो
भूयासं स्वाहेत्यनेन मंत्रेण। ततोऽनेनैव मंत्रेण द्वितीयां समिधमादधाति। अनेनैव च तृतीयां। एवं तिसृणां तासां समि-

दाधानमंत्रेष्वेव समुच्चयो वा। ततः उपविश्य पूर्ववत् परिसमूहनपर्युक्षणे। ततस्तत्रैव पाणी प्रतप्य प्रतप्य वक्ष्यमाणैः
सप्तभिर्मंत्रैः प्रतिमंत्रं मुखविमार्जनं। तनूपा अग्नेऽसि तन्वं मे पाहि। १ आयुर्दा अग्नेऽस्यायुर्मे देहि। २ वर्चोदा अग्नेऽसि
वर्चो मे देहि। ३ अग्ने यन्मे तन्वा ऊनं तन्म आपृण॥ ४ मेधां मे देवः सविता आदधातु। मेधां देवी सरस्वती आदधातु ६ मेधामश्विनौ
देवावाधत्तां पुष्करस्रजौ ७ इत्येतैः सप्तभिर्मुखविमार्जनं मंत्रैः। अत्र शिष्टाचारज्ञाः कैश्चन पदार्था लिख्यंते। अंगानि च म आ-
प्यायंतामित्यनेन मंत्रेण सर्वांगालंभनं। वाक् च म आप्यायतामिति मुखालंभनं। प्राणश्च म आप्यायतामिति नासिकालं-
भनं। चक्षुश्च म आप्यायतामिति चक्षुषोरालंभनं। श्रोत्रं च म आप्यायतामिति दक्षिणश्रोत्रालंभनं। यशो बलं च
म आप्यायतामिति मंत्रपाठमात्रं। ततः स्रुवप्रकरणं। भस्मना ललाटे ग्रीवायां दक्षिणे अंसे हृदि त्र्यायुषमिति प्रतिमंत्रं। ततो गो-
त्रनामपूर्वकं वैश्वानरादीनामभिवादनं॥ ७॥ अत्र भिक्षाचरणं। तत्र भवति भिक्षां देहीति वदन् ब्राह्मणो भिक्षां याचेत।
भिक्षां भवति देहीति क्षत्रियः। भिक्षां देहि भवतीति वैश्यः। यत्र प्रत्याख्यानं न कुर्वंति तत्र भिक्षार्थं गच्छेत्। तिस्रो वा भिक्षा आस-

मनुष्याद्दा ॥ ऽपपरमिताद्वा । मातुःस्वस्राऽस्त्रथमृत्तिक्षायास्त्वेत्येके आ आर्यामन्यते । एवं यो कोपि भिक्षां निष्ठिता ऽपाचार्याय मे दद्यं
निवेदयेत । भुंक्ष्वेत्याचार्येणानुज्ञातो भिक्षां स्वीकुर्यात् । वाग्यतो वाहःशेषमासीत । स्वयं प्रशीर्णाः समिध आहृत्यास्तमिते तस्मिन्ने
वाग्नेरुपरिसमूहनादि कृत्वा पर्युक्षणं तेन समिधं च यथानं पूर्ववत्कुर्यात् । ततो वाग्विसर्गो वा । अत आरभ्य ब्रह्मचर्यं समाप्ते
ब्रह्मचारिणोऽयमनियमाः कथ्यन्ते । अधःशायी स्यात् । अक्षारलवणाशी स्यात् । दंडधारणं कर्तव्यं । अरण्यात्स्वयं प्रशीर्णाः स
मिध आहृत्य सायंप्रातः संध्योपासनं कृत्वा परिसमूहनादि यथोक्तमग्निपरिचरणं कुर्यात् । गुरुशुश्रूषा च कर्तव्या । सायंप्रात
र्भोजनार्थं वारद्वयं यथोक्तं भिक्षाचरणं कर्तव्यं । मधुमांसाशनेन न कर्तव्यं । अनृतं न वक्तव्यं । मज्जनं न कर्तव्यं । उष्णोदकेन स्नायात् । दिवस्व
प्नं आसनस्यो परि मसूरिका धुपधानं कृत्वा नोपविशेत् । स्त्रीणामभिदर्शनं न कर्तव्यं । अदत्तं न गृह्णीयात् । स्मृत्यंतरोक्तान्य
यमनियमा अनुष्ठेयाः । यस्य वेदस्याध्ययनाय ब्रह्मचारी वेदाध्ययनापाठितव्याः । सोऽष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् । अ
स्मिन्पक्षे चतुर्णामपि वेदानामेकैकस्य द्वादश सर्वाण्येव वेदाध्ययनाध्येतव्याः । स्वशाखापूर्वकं । पञ्चमपि प्रथमं स्वशाखायाः ।

द्वादश द्वादशवर्षाण्येकैकस्य वेदस्य ब्रह्मचर्यं चरेत् । अस्मिन्पक्षे वेदारंभकाले एव वेद कृतयोव क्रमः पृथक्पृथक् । यावता का
लेन वेदग्रहणे समर्थस्तावंतं कालमेकैकस्य वेदस्य ब्रह्मचर्यं चरेत् । ब्राह्मणस्य ब्रह्मचारिणः शाणमयं वासो भवति परिधानीयं ।
क्षत्रियस्य क्षौमं आतसमित्यर्थः । आविकं वैश्यस्य । ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य ब्रह्मचारिणः । ऐणो मृगमिति हरिणपाश्वमेयस्य
ते । रौरवं चर्म राजन्यस्योत्तरीयं । आजं गव्यं वा चर्म वैश्यस्य ब्रह्मचारिण उत्तरीयं । ऐणेयालिमोभावे सर्वेषामेव ब्राह्मणादीनां गा
व्यमनडुचर्मोत्तरीयं भवति । मौंजी रशना ब्राह्मणस्य ब्रह्मचारिणो भवति । धनुर्ज्या राजन्यस्य रशना भवति । धनुर्ज्या धनुर्गुणः ।
मौर्वी वैश्यस्य रशना भवति । मुंजाभावे कुशमयी रशना ब्राह्मणस्य भवति । अश्मंतकमयी राजन्यस्य । बल्बजमयी वैश्यस्य । पा
लाशो दंडो ब्राह्मणस्य भवति । बैल्वो राजन्यस्य । औदुंबरो वैश्यस्य । सर्वे वा सर्वेषां ब्राह्मणादीनामनियमेन दंडा भवंति । आचा
र्येण हूतः सन्नुत्थाय प्रतिवचनं ददाति ब्रह्मचारी । तत्र यदि शयानं ब्रह्मचारिणमाकारयति आचार्यस्तदा उपविष्टो भूत्वा प्र
तिवचनं ददाति । उपासीनमुपविष्टमध्येवाह्वयति तदा तिष्ठन् प्रतिवचनं दद्यात् । तिष्ठंतं चेदाह्वयति तदा आभिमुख्येन क्रामन्

ति वयनं दद्यात्। अभिक्रामं तं वेदस्य प्रत्याचार्यस्तदा आभिमुख्येन धावन्प्रतिशृणुयात्। यथोक्तकारिणो ब्रह्मचारिणः फल
कथनं। स एवं वर्त्तमानो गुरुकुले वसत्यमुत्र च ब्रह्मसभा इति। तस्य स्नातकस्य का निर्भवति। त्रयः स्नातका भवंति। तानाह। विद्यास्नातको
व्रतस्नातको विद्याव्रतस्नातकश्चेति तेषां लक्षणमाह। समाप्य वेदमसमाप्य व्रतं यः समाप्य व्रतं यः समावर्त्तते स विद्यास्नातकः।
समाप्य व्रतमसमाप्य वेदं यः समावर्त्तते स व्रतस्नातकः। उभयं वेदव्रतं च समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति। व्रत
शब्देनात्र एकैकस्य वेदस्य द्वादशवार्षिकं ब्रह्मचर्यं तच्चरणमुच्यते। अर्वाक् षोडशाद्वर्षाद्ब्राह्मणस्यानतीत एव कालो भ
वत्युपनयनस्य। आद्वाविंशाद्राजन्यस्य। आ चतुर्विंशाद्वैश्यस्य। अनुपनीतो ब्राह्मणः षोडशीयवर्षे पतितसावित्रीको भवति।
द्वाविंशे राजन्यः। चतुर्विंशे वैश्यः पतितसावित्रीको भवति। अत ऊर्ध्वं नैतान् पतितसावित्रीकानुपनयेयुः। नाध्यापयेयुः। न
याजयेयुः। नैभिः सह व्यवहरेरन्निति। यस्य कर्मणो यः कालस्तं कालमतिक्रमे अनादिष्टं प्रायश्चित्तं हुत्वा तत्कर्म कर्तव्यं भू
॥ छ ॥ ॥ भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। भूर्भुवः स्वाहा। त्वन्नो अग्ने। स त्वन्नो अग्ने। अयाश्चाग्ने। ये ते शतं। उदुत्तमं

२५

मित्येतदनादिष्टं प्रायश्चित्तं। नात्र ब्रह्मोपवेशनादि कर्तव्यं। किंतु पूर्णाहुतिवदाज्यं संस्कृत्य कर्तव्यं। निरूप्याज्यमधिश्रित्य। स्रु
वं दर्भैः संमृज्याग्नावास्थाप्य स्रुवेण तिष्ठन्समिधमाधाय। स्रुवेण जुहुयात्। कालव्यतिक्रममुक्त्वाऽन्यस्मिन्नपि कर्मलोपे
तदेतदेव प्रायश्चित्तं भवति। त्रिपुरुषं पतितसावित्रीकाणामपत्यस्य संस्कारोऽध्यापनं च नैव भवति। तेषां मध्ये यः संस्का
रमिच्छति स व्रात्यस्तोमेनेष्ट्वा व्यवहार्यो भवति। अधीयीनीत च। अधीयीरन्व्यवहार्या भवंतीति वचनात्॥ छ ॥ व्रतादेशो
वेदारंभः। तत्र मातृपूजापूर्वकं नांदीमुखश्राद्धं कृत्वा पंचभूसंस्कारपूर्वकं लौकिकाग्नेः स्थापनं। ततो ब्रह्मोपवेशनाद्याज्यभा
गांते चरुवर्जम्। आज्यभागानंतरं। पृथिव्यै स्वाहा। अग्नये स्वाहा। एवमृग्वेदारंभे। यदि यजुर्वेदारंभस्तदाज्यभागानंतरं।
अंतरिक्षाय स्वाहा। वायवे स्वाहा। यदि सामवेदारंभस्तदाज्यभागानंतरं। दिवे स्वाहा। सूर्याय स्वाहा। यदि अथर्ववेदारंभस्तदा
ज्यभागानंतरं। दिग्भ्यः स्वाहा। चंद्रमसे स्वाहा। एवमाज्यभागानंतरं। यथावेदं देवताहुतीर्हुत्वाऽपरान्नाहुतयः। ब्रह्मणे स्वाहा।
छंदोभ्यः स्वाहा। प्रजापतये स्वाहा। देवेभ्यः स्वा०। ऋषिभ्यः स्वा०। श्रद्धायै स्वा०। मेधायै स्वा०। सदसस्पतये स्वा०। अनुमतये स्वा०।

यद्येकवेदः सर्ववेदार्थं समस्तदाप्रातवेदं स्ववेदाहुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्य इत्याहुतिद्वयं होतव्यं । ततः प्रजापतय इत्याद्याः सप्ताहुत
यस्तंत्रेण । ततो महाव्याहृत्यादि स्विष्टकृदंता दशाहुतयः । ततः संस्रवप्राशनं । पूर्णपात्रवरयोरन्यतरस्य ब्रह्मणे दानं ।
ततो वेदार्थं सः ॥ ॥ ७ ॥ वेदमधीत्य गुरूणानुज्ञातः स्नायात् । ब्रह्मचर्यं वा द्वा चत्वारिंशकं समाप्य गुर्वनुज्ञातः स्नायात् । द्वा
दशवार्षिकं वा व्रतं समाप्य गुर्वनुज्ञातः स्नायात् ७ भूयं वासस्य स्नायात् । वेदशब्देनात्र विधिविधेयस्तर्क इत्येतत्त्रयमुच्यते । वि
धिर्विधायकं ब्राह्मणवाक्यं । विधेया मंत्राः । तर्कोर्थवादः । षडंगमेके । शिक्षाकल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति त्रि
भिः षड्भिरंगैः सहितं वेदमधीत्यावगम्यार्थं स्नायादिति एके आचार्याः । न कल्पमात्रेण ग्रंथमात्रेऽधीते अनवबुद्धे स्नानमि
छंति । अनुष्ठानायोग्यत्वात् । ग्रंथमात्राध्ययनेपि कृते याज्ञिको यज्ञविद्याकुशलः कामं स्नायात् ॥ ७ ॥ स्नानेमाहरत्यू (?)
नापूर्वकं तां । गुरवे भ्यर्थ्य (?) कृत्वा । ततः आचार्यं स्नास्य इत्युक्त्वा प्रार्थनं ब्रह्मचारिणः । स्नाहीति प्रत्यनुज्ञा गुरोः । त
तः पादोपसंग्रहणं गुरोः । ततः परिश्रितेपं भूसंस्कारान्कृत्वा लौकिकाग्निस्थापनं । ततो ब्रह्मोपवेशनादि चाज्यभागांतं वरुणं

कृत्वाज्यभागांते वेदाहुतं स्ववेदाहुतिहोमः । तत्र यद्यृग्वेदमधीत्य स्नानं करोति तदा पृथिव्यै स्वाहा । अग्नये स्वाहेत्या
हुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्य इत्यारभ्यानुमतय इत्यंतानवाहुतीर्जुहोति । यदि यजुर्वेदमधीत्य स्नानं करोति तदान्तरिक्षाय स्वाहा
वायव इत्याहुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्य इत्यारभ्यानुमत्यंतान्नवाहुतीर्जुहोति । एवं सामवेदे दिवे सूर्यायेत्याहुतिद्वयं कृत्वा
ब्रह्मणे छंदोभ्य इत्याद्याहुतीर्जुहोति । एवमथर्ववेदे दिग्भ्यश्चंद्रमस इत्याहुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्य इत्याहुतीर्जुहोति । यदि
चत्वारोपि वेदानध्ययमधीत्य स्नानं करोति तदाज्यभागानंतरं प्रतिवेदाहुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्य इत्याहुतिद्वयं पुनः पुनर्जुहोति ।
ततः प्रजापतय इत्यारभ्यानुमतय इत्यंताः सप्ताहुतीस्तंत्रेणाजुहोति । एवं वेदद्वयत्रयाध्ययनेपि योज्यं । ततो महाव्याहृत्यादि
स्विष्टकृदंता दशाहुतयः । ततः संस्रवप्राशनं । पूर्णपात्रवरयोरन्यतरस्य ब्रह्मणे दानं । ततः परिसमूहनादिब्याचुषकरणां
तं समिदाधानं ब्रह्मचारिणः । ततः परिश्रितस्योत्तरतः स्थानार्थमुदकुंभानां दक्षिणोत्तरायतानां स्थापनं । उदकुंभानां पुर
स्तात्प्रागग्रं कुशास्तरणं । तेषु स्नानकर्ता स्थित्वा । ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूखो मनोहास्खलो विरुजस्त

न्द्रष्टारिंद्रियहा तान्विजहामि यो रोचन स्तमिह गृह्णामीत्यनेन मंत्रेण। एकस्मादुदकुंभादुदकं गृहीत्वा तेनोदकेनानु
षिंचते स्नानकर्त्तारं मानो। तेन मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेत्यनेन मंत्रेण। पुनर्ये
न्तरग्नय इत्यनेन मंत्रेणोदकमादाय द्वितीयादुदकुंभाद्येन श्रियमकृणुतां येनावमृशतां सुरां। येनाक्षावभ्यषि
ञ्चतां यद्वांतदश्विनायश इत्यनेन मंत्रेण द्वितीयमभिषिंचते। पुनर्ये अप्स्वन्तरग्नय इत्यनेन मंत्रेणोदकमादाय तृतीयादु
दकुंभादापो हि ष्ठेत्यनया ऋचा तृतीयमभिषेकः। पुनर्ये अप्स्वन्तरग्नय इत्यनेनोदकमादाय चतुर्थादुदकुंभात् यो वः शिवतमो र
स इत्यनया चाभिषेकः। पुनर्ये अप्स्वन्तरग्नय इत्यनेनोदकमादाय पंचमादुदकुंभात् तस्मा अरं गमाम व इत्यनया चाभिषेकः। तेनो
यो अप्स्वन्तरग्नय इत्यनेन मंत्रेण षष्ठसप्तमाष्टमकुंभेभ्यः प्रत्येकमुदकमादाय तत्तन्मंत्रेण त्र्यमभिषिंचेत् स्नानकर्त्ता मानी। तेन
उदुत्तमं मित्यनया चाभिमेखलां शिरोमार्गेण निःसार्य निधाय तीर्थे स्नायीत। अन्यद्वासः परिधायादित्यमुपतिष्ठते ब्रह्मचारी। उद्य
न्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थात् दशसनिरसि दशसनिं मा कुर्वाविदन्मागमय। उद्यन्भ्राजभृष्णुरिंद्रो मरु

१८

द्भिरस्थाद्दिवायामभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मागमय। उद्यन्भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात्सायं यावभि
रस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मागमयेत्यादित्योपस्थानमंत्रः। ततो दधि तिलान्प्राश्य जटालोमनखानां सं
निकृन्तनं। स्नानं। उदुंबरकाष्ठेन दन्तधावनमन्नाद्याय व्यूहध्वं सोमो राजायमागमत्। स मे मुखं प्रमार्क्ष्यते यशसा
च भगेन चेत्यनेन मंत्रेण। ततः सुगंधिना द्रव्येण उद्वर्तनं। पुनः स्नानं घृततैलेपनं गृहीत्वा मुखनासिकयोरालेपनं। प्राणापानौ मे
तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेत्यनेन मंत्रेण। ततः पाण्योरवनेजनं कृत्वा तदुदकमादायापसव्यं कृत्वा दक्षिणामुखो
भूत्वा तदुदकं दक्षिणस्यां दिशि निषिंचेत्। पितरः शुन्धध्वमित्यनेन मंत्रेण। ततो यज्ञोपवीती भूत्वोदकमुपस्पृश्य नि
त तर्च्छन्नादिना स्नानमनुलिप्य जपेत् सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासमिति। मंत्र
अहतवाससः परिधानमरजकधौतस्य वा। परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरू
ची रायस्पोषमभिसंव्ययिष्य इत्यनेन मंत्रेण। अथोत्तरीयं। यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यश

२७

गज्ञमा विदद्यशो मा यशोमा प्रतिपद्यतामित्यनेन मंत्रेण छादयीत। एकवेद्वासो भवति। तदा तस्यैव परिधानीयवाससः
उत्तरार्द्धमुत्तरीयं कुर्यात्। यशसा मा द्यावापृथिवी इत्यनेन मंत्रेण। या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय। ता अ
प्रतिगृह्णामि यशसा च भगेन चेत्यनेन मंत्रेण पुष्पमालां गृह्णीयात्। ततः शिरसि बंधनं। यदप्सरसा मि जमदग्निकाराद् ए
भूतेन संग्रथिताः सुमनस आबध्नामि यशो मयीत्यनेन मंत्रेण। उष्णीषेण शिरो वेष्टयेत्। युवा सुवासा इत्यनेन मं
त्रेण। अलंकरणमसि भूयोऽलंकरणं भूयादित्यनेन मंत्रेण कर्णवेष्टकयोः प्रतिमोकः। प्रथमं दक्षिणे कर्णे। ततोऽनेन
मंत्रेण वामकर्णे। वृत्रस्य कनीनकासि चक्षुर्दा असि चक्षुर्मे देहीत्यनेन मंत्रेण आंजनी अंक्तौ। प्रथमं दक्षिणं ततो
वामं। रोचिष्णुरसीत्यनेन मंत्रेण आत्मानमादर्शे प्रेक्षते। छत्रं प्रतिगृह्णाति। बृहस्पतेश्छदिरसि पाप्मनो मामंत
र्हितेजसो यशसो मामंतर्हीत्यनेन मंत्रेण। प्रतिष्ठे स्थो विश्वतो मा पातमित्यनेन मंत्रेण उपानहौ प्रतिमुंचते पादयोः
युगपत्। विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत इत्यनेन मंत्रेण वैणवं दंडमादत्ते। अभिषेकादि दंडदानांतं स्नानकर्मा

कर्म करोति। नाचार्यः। दंतप्रक्षालनादीनि नित्यमपि मंत्रवंति भवंति। वासश्छत्रोपानहां च नवानामुपादाने मंत्रोपयोगः।
॥ ॥७॥ स्नातकस्य यमान् वक्ष्यामः॥ ॥कामादितरः। स्नातकादितरः भृङ्गः। इच्छया भृद्यापि स्नातकोऽयमेव धीयात्रे यते। नृ
त्यगीतवादित्राणि स्वयं न कुर्यात्। परेण क्रियमाणानि नृत्यगीतवादित्राणि प्रति न गच्छेत्। इच्छया परैः क्रियमाणानि
प्रतिगच्छेत्। स्वयं कुर्यात्। क्षेमे सति ग्रामे रात्रौ ग्रामांतरं न गच्छेत्। अक्षेमे तु कामं गच्छेत्। न च क्षेमे सति धावेत्। उदपा
नावेक्षणं वृक्षारोहणफलप्रचयनसंधिसर्पणाविवृतस्नानविषमलंघनशुक्लवदनसंध्यादित्यप्रेक्षणभैक्षणा
नि न कुर्यात्। वर्षत्यप्रावृतो व्रजेत्। अयमेव वज्रः पाप्मानं पृणादित्यनेन मंत्रेण। अप्स्वात्मानं नावेक्षते। अजातलोम्नीं विपुं
सीं षंढं च नोपहसेत्। न गर्भिणीं विजन्येति ब्रूयात्। सकुलमिति नकुलं। भगालमिति कपालं। मणि
मणि धनुरिति इंद्रधनुः। गां धयंतीं परस्मै नाचक्षीत। ऊर्ध्वं यो रोमंतिष्ठं तायां भूमावसर्पं स्तिष्ठन् मूत्रपुरीषे कुर्यात्। स

यं प्रक्षीणेन कच्छिन गुदं प्रमृंजीत। विहृतं वासो नाच्छादयीत। दंडव्रतो व यत्र स्यात्। सर्वेषां मित्रमिव। स्नातस्य सततं आहारान्
न्नं व्रतचर्याभ्यपेते। अमांसाशी भवति। अमृन्मयेन पात्रेण पिबति। स्त्रीशूद्रशवकाकशुनां दर्शनं न कुर्यात्। संभाषणं च स्त्र्या
दिभिः सह न कुर्यात्। शवं भूत्वा सूतिकान्नं निर्वपाद्यात्। शावे सति क्रीत्वा लब्ध्वा वा अथवैर्य दन्तमध्ये तेनान्नाद्यादित्यर्थः
भूजस्य नां पितादेरप्यन्नं नाद्यात्। सूतिकान्नं चान्नं नाद्यात्। मूत्रपुरीषे ष्ठीवनं चातपेन कुर्यात्। सूर्याभ्युत्थमनेनीतच्छ
त्रछत्रादिना। तृष्णोदकार्थं कुर्वीत। अवस्योपपादना रात्रौ भोजनं न कर्तव्यं। सत्यवदनमेव वा कर्तव्यं। गोयसूनान
नाअमाङ्सासूयादयो यमनियमाः कर्तव्याः। यदि ब्रह्मचर्याद्दीक्षितो भवति तदा मूत्रपुरीषे ष्ठीवनं चातपेन कुर्यादि[illegible]
यमादीनि कुर्यात्॥ ॥ अथातः पंचमहायज्ञाः ज्ञेयाः। तत्र प्रथम प्रयोगो आवसथ्याधानदिवसे मारभ्य दर्शपूर्वेकुमा
मुद्दम्यकेन्वा [illegible] मेकमेव पंचमहायज्ञार्थम्। ततो वैश्वदेवादन्नाद् [illegible] पर्युक्ष्य [illegible] तेन जुहुयात्। ओं ब्रह्मणे स्वा
हा। आद्येदं षड्पुलाः स्वाहाकारवर्जिता स्यागाः प्रजापतये स्वाहा। गृह्याभ्यः स्वाहा। कश्यपाय स्वाहा। अनुम

तये स्वाहा। इत्येकाहुतिको होमो देवयज्ञसंज्ञकः। नात्र संस्रवप्राशनं। अथ भूतयज्ञः। पर्जन्याय नमः। अद्भ्यो नमः। पृथिव्यै नमः।
इति मणिके बलित्रयं। धात्रे नमः। इति द्वार्ययोर्बलिद्वयं। ततो वायवे नमः इति पुरस्तादारभ्य प्रा[illegible] प्रदक्षिणं बलिचतुष्ट
यं। ततस्तेषामेव पुरस्तादुत्तरतो वा प्रजापतये के प्राच्यादिभ्यो बलिचतुष्टयं। प्राच्यै दिशे नमः। दक्षिणायै दिशे नमः। प्रतीच्यै दिश
नमः। उदीच्यै दिशे नमः। इति। ततो बलिहरणादेशस्य मध्ये बलित्रयं प्राक्संस्थं ब्रह्मणे नमः। अंतरिक्षाय नमः। सू[illegible]
य नमः। तेषामुत्तरतो बलिद्वयं। विश्वेभ्यो देवेभ्यो नमः। विश्वेभ्यो भूतेभ्यो नमः इति। तयोरुत्तरतो बलि द्वयं। उष[illegible]
नमः। भूतानां च पतये नमः। इति भूतयज्ञः। अथ पितृयज्ञः। प्राचीनावीती दक्षिणामुखो ब्रह्मणे नमः इत्यादिक[illegible] बलित्र
स्य दक्षिणतः पितृभ्यः स्वधा नमः इति बलिं दद्यात्। इति पितृयज्ञः। तस्यैव बलिहरणे [illegible] उत्तरापरस्यां [illegible]
निर्णेजनं निनयेत्। ततो निर्णेजनामत्यनेन मंत्रेण। ततो वैश्वदेवादन्नादुद्धृत्य [illegible] परिमितमन्नं [illegible]
वेदब्राह्मणाय दद्यादिदमन्नं मनुष्याय इति अनेन मंत्रेण। इति मनुष्ययज्ञः। अथ ब्रह्मयज्ञः। यथा [illegible]

२८

ष्टकेभ्योऽतिथिभ्यश्च विभागं कृत्वा बालज्येष्ठा गृह्याश्च सर्वे यथार्हमश्नीयुः। ततो जायापती अश्नीयातां। पूर्वो वा गृहप
तिरश्नीयात्॥ ॥अथातोऽध्यायोपाकर्माध्यापयतो भवति। श्रावणशुक्लपंचम्यां। हस्ते वा श्रावणस्य कृष्णपक्ष एव। श्रावण्यां
वा। श्रवणे वा। तत्र प्रथमप्रयोगे मातृपूर्वकमाभ्युदयिकं श्राद्धं। आचार्यस्य वावसथ्याग्नौ कर्म। अस्तोपवेशनादि घाज्य
भागांते विशेषः तंडुलस्थाने अक्षतधानासादनं। प्रोक्षणं च। उपकल्पनीयानि। औदुंबर्यः समिधः। दधि। आकर्षफल
कं। तिलाः। अक्षतार्थं धानाः। आज्यभागानंतरं वेदाहुतीनामनुमत्यैतानां होमो वेदारंभवत्। एकदा सर्ववेदोपाकरणे वेदाभि
वेदमाहुतिद्वयं कृत्वा ब्रह्मणे छंदोभ्यश्च व्याहुतिद्वयं पुनः पुनर्हुतिर्वा। प्रजापत्याद्यनुमत्यंताः सप्ताहुतयस्तंत्रेण। ततः सदस
स्पतिमिति मंत्रेण यवाक्षतधानाहोमः। सदसस्पतिमित्यनेन मंत्रेण शिष्या अनुपठेयुः। तत आचार्यशिष्याः सर्वे औदुंबर्यस्तिस्रः स
मिध आर्द्राः सपलाशा घृताक्ताः आदध्युः तत्सवितुर्वरेण्यमित्यनयर्चा भेदेन समिद्धानी। यदि तत्र ब्रह्मचारिणः शि
शिष्यास्तेषामग्निकार्यमंत्रेणैव समिदाधानं भवति। एवं द्विरपरं धानाहोमः समिदाधानं च। तत आचार्यशिष्याश्च स्ति

तिस्रस्तिस्रो अक्षतधाना अनवखंडयंतः अश्नीयुः शन्नो भवंत्वित्यनयर्चा। ततो दधिक्राव्णो इत्यनयर्चा दधिभक्षणं सर्वेषां। त
तो यावंतो गणमिलिता आचार्यस्तावतस्तिलानाकर्षफलकेन जुहुयात् सावित्र्या। इदं सावित्र्या ऋत्विग्भ्योऽतिरिक्तेनेनानुपाकेन वा। ततो धानाभ्यः
स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यंता नवाहुतयः। ततः संस्रवप्राशनं। ब्रह्मणो दक्षिणादानं। ततः अग्नेः पुरस्तादुपविष्टेभ्यः
शिष्येभ्यः प्राङ्मुख आचार्यः ॐकारमुक्त्वा त्रिश्च सावित्रीमुक्त्वा इषे त्वाद्यध्यायादीन्प्रब्रूयात्। बह्वृचानां यथोक्तं। सर्वे आचार्य
शिष्याः जपंति। सहनोस्तु सहनाववतु सहनः इदं वीर्यवदस्तु ब्रह्म इंद्रस्तद्वेद येन यथा न विद्विषामहै इत्येतं मंत्रं। ततस्त्रिरात्रमनध्या
यः लोमनखानामनिकृंतनं च त्रिरात्रमेव। प्रागुत्सर्गाद्वा लोमनखानामनिकृंतनं। अतः परं मंत्रब्राह्मणयोरध्ययनं प्रागध्या
योत्सर्गात्॥ ७॥ पौषस्य रोहिण्यां मध्यमायां वाष्टकायां पौषस्य वाध्यायोत्सर्गः। तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं
उदकांतगमनं। स्नात्वा ब्रह्मादीन्देवादींस्तर्पयेत्। देवाः तृप्यंतां १ छंदांसि तृप्यंतु २ वेदास्तृप्यंतु ३ ऋषयस्तृप्यंतु ४ पुराणाचार्या
तृप्यंतु ५ गंधर्वास्तृप्यंतु ६ इतराचार्यास्तृप्यंतु ७ संवत्सरः सावयवस्तृप्यंतु ८ पितरस्तृप्यंतु ९ आचार्यास्तृप्यंतु १० नाम

ओंकारोच्चारणपूर्वकं स्वांश्च पित्रादीं स्तर्पयेयुः। जीवत्पितृकाणां तु पितामहादितर्पणं। ततस्तत्सवितुरित्यस्याः सावित्र्याः सहस्रं [illegible] मादै
विरतास्मई तिवसरू ४ ह्यमुः। उपाकर्मवद्ध्यायादि पूर्ववपाभनध्ययनं। लोमनखानामनिकृंतनं। [illegible]। ततस्त्रिरात्राद् [illegible]
पुष्ठंदाः २ स्यधीयीरन्। कृष्णपक्षेष्वंगानि। ततः पुनस्तैष्यान्मासान् धीत्या [illegible] सप्तमासांश्चाधीत्योत्सर्गः। तत्र प्रथमप्रयोगे मातृपूजा
पूर्वकमाभ्युदयिकं श्राद्धं। ततः उत्सोकवीपु वाय्यानो धर्मपरापतत्। परिसंख्यस्य भूर्मिणो विसरख्यानि विरजामहे त्वेदीत्यादिमन्त्रैः
तिसर्वे शिष्याः सर्वे प्राशि ष्याणां त्रिरात्रं सहासनं। ततो मध्ये [illegible] विप्रयोगः॥ ७॥ पुण्याहे लांगलयोजनं उदगयने घृताक्त [illegible] पि॥
नक्षत्रवा। तत्रैतत्सेथमहरुषिप्रस्वस्य भवति। तत्र मातृपूजापूर्वकं श्राद्धं। ततो दधितंडुलादिसंस्तारानादपजांगलेयोजनं [illegible]
गमनं। तत्र स्थंडिलानुलेपनं। तत्र ५ दधितंडुलगंधाक्षतमिश्रितेरिंद्रादिभ्यो बलिहरणं हस्तेनेव। इंद्रायनमः। १ पर्जन्यायनमः।
अश्विभ्यां ३ मरुद्भ्यो ४ उदकोलोदपाय ५ स्वातिकायै ६ स्तानायै ७। अनुमत्यै नमः इति। ततः अनडुहो मधुपर्कैः तं वासायेत। तं
अनडुहस्लो पोबलिद्रव्यस्तैर्गंधमाल्यादिनामर्चयेत्। ततः अनडुहे गोषर्पणं। ततो ब्राह्मण भोजनं॥ छ॥ ॥ उ [illegible]

स्वपक्षयोर्वै पर्वकाले। मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा वसथ्याग्नौ कर्म भवति। तत्र ब्रह्मोपवेशनादि आघारान्ते विशेषः
तंडुलस्थालीसिद्धस्य स्थालीपाकस्यासादनं प्रोक्षणं च। आज्यस्तागाने तरं स्थालीपाकेन लांगलयोजनदेवताभ्यो [illegible] होमः
पस्वाहा। १ पर्जन्यायस्वाहा। २ अश्विभ्यां स्वाहा। ३ मरुद्भ्यः स्वाहा। ४ उदकोलकाश्यपाय स्वाहा। ५ स्वातिकायै स्वाहा। ६ सीतायै स्वाहा। ७
अनुमत्यै स्वाहा। ८ ततः स्थालीपाकेन स्विष्टकृत्। ततो महाव्याहृत्यादिप्राजापत्यांतानं वा कुर्तयः। संस्रवप्राशनं। ब्रह्मणे दक्षि
णादानं। ततो ब्राह्मणभोजनं॥ छ॥ अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्यां। तत्र प्रथमप्रयोगे मातृपूजापूर्वकं नांदीश्राद्धं
[illegible] अवसथ्याग्नौ कर्म। ब्रह्मोपवेशनादि आघारान्ते विशेषः। चरुपात्रान्तरं तेसर्जनस्यासादनं। तत्र एककपालं। तंडुलाः। तर्
पवानामासादनं। ततः पिष्टानां आज्यस्य दर्वी च यथासादितानां। उपकल्पनीयानि। दर्वी उपलिः। शूर्पं। उल्का। उदपात्रं। देवदारुकंक
तत्रयं। अंजनं। अनुलेपनं। स्रजमणि। ततः पवित्रकरणादि प्रोक्षणी निधानांते चरुः। देवस्यात्वेति ततो भर्जनाधिश्रयणं। ५
र्जनस्यान्तरतः एककपालस्योपधानं। तत आज्यस्थाल्यामाज्यनिर्वापः। चरुपात्रे ब्रणीतातः कर्मासिक्य तंडुलप्रक्षेपः। ब्रणी

३२

नोदकेन विछसंयवनं । उपाऽस्याधिश्रयणं । तदुत्तरतश्चरोरधिश्रयणं । मर्जनेयवाधिश्रयणं । कपाले पुरोडाशमधिश्रित्य धानालके
पालं प्रथनं । सर्वेषां पर्यग्निकरणं । स्रुवप्रतपनं । आज्योद्वासनं । चरुमुद्वास्याज्यस्योत्तरतः स्थापनं । धानामुद्वास्य चरोरुत्तरतः स्था-
पनं । पुरोडाशमुद्वास्य धानानामुत्तरतः स्थापनं । आज्योत्पवनं । अवेक्षणं । प्रोक्षण्युत्पवनं । धानानां भूयसीः पिष्ट्वा अस्थानां
स्थापनं । घृतेन सक्तूनामंजनं । ततउपयमनकुशादानं । ध्याऽऽत्ता गार्ने । आज्यभागान्ते चरमाहुतिद्वयमाज्येन । अथ श्वेतपदाग्ने
हिमवत्पाचापरेणाद्वे । सप्त च वारुणीरिमाः सर्वाः सर्वशिरा राजबान्धवैः स्वाहा इत्यनेन मंत्रेण प्रथमाहुतिः । इदं श्वेतपदे । न वै श्वेत
स्याध्याचारेऽहिर्ददर्श कंचन । श्वेताय वैदार्व्याय नमः स्वाहा इत्यनेन द्वितीया । इदं श्वेताय वैदार्व्याय । ततः स्थालीपाकेनाहुतिचतुष्टयं ।
विष्णवे स्वाहा । इदं विष्णवे । श्रवणाय स्वाहा । इदं श्रवणाय । श्रावण्यै पौर्णमास्यै स्वाहा । इदं श्रावण्यै पौर्णमास्यै । वर्षाभ्यः स्वा-
हा । इदं वर्षाभ्यः । धानावंतं करंभिणमिति धानानामेकाहुतिः । इदमिंद्राय । ततः सक्तूनामाहुतित्रयं । आग्नेयपांडुपार्थिवानां स-
र्पाणामधिपतये स्वाहा । श्वेतवायवांतरिक्षाणां सर्पाणामधिपतये स्वाहा । अभिभूः सौर्यदिव्यानां सर्पाणामधिपतये स्वा-

हा । यथामंत्रं त्यागाः स्वाहाकारवर्जिता द्रष्टव्याः । ततः । श्रवाय भौमाय स्वाहा इत्यनेन मंत्रेण सर्वहुतमेकं कपालं जुहोति । इदं
श्रवाय भौमाय । ततश्चरुधानासक्तुभ्यः स्विष्टकृत् । ततो महाव्याहृत्यादि प्राजापत्यांतान् वाहुतयः । ततः संस्रवप्राशनं । पूर्णपा-
त्रवरयोरन्यतरस्य ब्रह्मणो दानं । सक्तुशेषं एकदेशस्य शूर्पे प्रक्षेपः । शालाया बहिर्निष्क्रमणं । बहिरेव स्थंडिलोपलेपनं । ततः
उल्कायां ध्रियमाणायां मा अंतरा गमंतेति प्रेष्यमुल्का वाग्यतः स्थंडिले सर्पानवनेजयत्याग्नेयपांडुपार्थिवानामित्यादिभिर्मंत्रैः
प्रतिमंत्रं । तत्र अधिपतेऽवनेनिक्ष्वेति प्रयोगः । ततो यथावनिक्तं बलिहरणं दर्व्या सक्तुहोमार्थया यथादामते रेवमंत्रैः प्रतिमंत्रं । त-
त्र अधिपत एष ते बलिरिति प्रयोगः । ततः पुनरवनेजनं पूर्ववत् । ततः कंकतैः प्रतिबलि प्रलेखनं तैरेव मंत्रैः प्रतिमंत्रं । तत्र अधिप-
ते प्रलिखस्वेति प्रयोगः । ततः प्रतिबलि अंजनदानमुक्तैर्मंत्रैः प्रतिमंत्रं । अधिपतेंऽजस्वेति प्रयोगः । ततः प्रतिबलि अनुलेपनं । तत्र अधिपते
ऽनुलिंपस्वेति प्रयोगः । ततः प्रतिबलि स्रग्दानमुक्तैर्मंत्रैः प्रतिमंत्रं । तत्र अधिपते स्रजोऽपिनह्यस्वेति प्रयोगः । ततः सक्तुशेषस्य स्थंडिले निवपनं ।
उदपात्रानिनयनं सक्तुशेषस्योपरि । नमोऽस्तु सर्पेभ्यो इति तिसृभिः ऋग्भिरुपस्थानं । सयावंतं कामयेत । एतावंतं दर्शीनसर्पाः प्रविशेयुरिति

३२

यावंतं गृहदेवानुदकधारयासततयात्रिः परिषिंचन्परी यादयथ्येतपदान इति द्वाभ्यां मंत्राभ्यां पूर्वोक्ताभ्यां स कृत्स्नं त्रेता परिगमनं द्विः स्त्र
इवेरभ्रूपैवत्रज्ञा स्योत्सा त्का यांप्रतप्वाल्का धाराय प्रयच्छति। द्वारदेशो मार्जनं सर्वपामा पोहिष्ठेति तिस्रभिर्ऋग्भिः। अनवखेदिर्वतो धानाः
त्वामिति मार्जनया नाघा धानेय जमानब्रह्मोल्का धारिणां। ततो ब्राह्मणभोजनं॥ स कृत्स्नो पस्यस्त्वा पर्नेसु गृह्ये भिडे ततो त्वमिते त्वमिते प्रद
त्वामिति मार्जनया नाघा धानेय जमानब्रह्मोल्का धारिणां। ततो ब्राह्मणभोजनं॥ स कृत्स्नो पस्यस्त्वा पर्नेसु गृह्ये भिडे ततो त्वमिते त्वमिते प्रद
ताणी मार्जनम्। तत्सतिष्ठोत्का धारणादि बलिहरणां कंकतपरिलेखनांतं पूर्ववदाये हायणं तं मातरागमतेति श्रेषास्ता वैपि अंतरागमनाभावः दर्श
ततो मांत्रानुत्का धारणादि बलिहरणां कंकतपरिलेखनांतं पूर्ववत्। श्रावणीबलिहरणं॥ छ॥ ॥ अथ भाद्रपदपौर्णमास्यामिंद्रयज्ञः। तत्र प्रथमं ग्रयोग
स्थप्रक्षालनं निधानं। एवमन्यहशालायाः बाह्यपलिप्तस्थंडिले बलिहरणं॥ छ॥
मालह्रष्ट्वा पूर्वकर्मा अदयिकं चादि कृत्वा आवसथ्या ग्नौ कर्म। ब्रह्मोपवेशनाद्या आज्यभागांते विशेषः सप्तीरवणयनं। उपकल्पनीयानि पिष्ट
अश्वलपचारित्सेह्य। निरूप्याज्यं प्रणीताभ्यः क्षीरमुसस्य वरुपात्रे तंडुलप्रक्षेपः। प्रणीतोदकेनपिष्टसंयवनं। आज्याधिश्रयणं भातश्र
परतश्चोरोदाधिश्रयणं। तदुत्तरतश्च कुर्णामि पूपानामधिश्रयणं। आज्ये पलयनारम्भे ररप्रपेस्तरणं। पुरस्तात् स्विष्टकृतं दक्षिणं। आज्यभागां
ते पंचाहुतयः इंद्रायस्वाहा। इदमिंद्राय। इंद्राण्यै स्वाहा। इदमिंद्राण्यै। अजायैकपदे स्वाहा। इदमजायैकपदे। अहिर्बुध्न्याय स्वाहा
इदमहिर्बुध्न्याय। प्रोष्ठपदाभ्यः स्वाहा। इदं प्रोष्ठपदाभ्यः। ततः पायसेनेन्द्राय स्वाहेत्येव हुतिः। इदमिंद्राय। ततः पायसेनैव स्विष्टकृत्। ततो महाव्या

हृत्यादि प्राजापत्यांतानि वा हुतयः। ततः संस्रवप्राशनं। ब्राह्मणे दक्षिणादानं। ततः प्राक्संस्थान्युदक्संस्थानि वा। स प्रागग्नेरुपशमनिर्णा निरूप्य ते
मरुद्भ्यो बलिहरणं पायसशेषेण वृक्षकेषु मनसा पतेत्। प्रश्नेत्येवमाद्यैः षड्भिर्मंत्रैर्नमस्कारांतैरुदयश्च भीमश्च ध्वांतश्च सप्तमेन मानसोच्चारितेन प्रति
मंत्रं। सप्तसु वृक्षेषु एकैकस्य बलिदानं। मंत्रांतेषु केष्वपि तेनप्रयोगः। सत्योगाश्च भुक्तं पोतिश्च ० ऋतश्च सत्यश्च हानमः इदं भुक्तं पोति पवित्रं पो
मंत्रं। सप्तसु वृक्षेषु एकैकस्य बलिदानं। इदं ध्वांताय ध्वनये नमः इदमीदृक्षे न्यादृक्षे स्वदृक्षे अमिसदृक्षे प्रमितायसं
तिपिसत्यपोनिपिड्योति भूतेषु कायक्रतयसे अस्पृष्टसच। इदं धात्रे विधात्रे विधारयाय च ० अमित्रश्च गणानमः
मसेव। ऋतश्च विधायरयोनमः इदमृताय सत्याय ध्रुवाय धरुणाय धर्त्रे विधर्त्रे विधारयाय च। ऋतजिच्च ० अमित्रश्च गणानमः
इदमृतजिते सत्यजिते सेनाजिते सुषेणाय पर्यात्तिमित्राय दूरे अमित्राय गणाय च॥ ४ ईदृक्षास एतादृक्षास ऊषुणः सदृक्षास प्रतिसदृक्षास एतन मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन्नमः इदमीदृक्षेभ्यः
इदमृतजिते सत्यजिते सेनाजिते सुषेणाय पर्यात्तिमित्राय दूरे अमित्राय गणाय च
भ्यः प्रतिसदृक्षेभ्यो मितेभ्यः संमितेभ्यः सभरेभ्यो मरुद्भ्यश्च॥ ५ स्वतवांश्च ० शाकीनो जनो दीनमः इदं स्वतवसे प्रघासिने सांतपना
य गृहमेधिने क्रीडिने शाकिने उज्जेषिणे च। इदं उग्रश्च भीमश्च। विक्षिपः स्वाहा नमः इदमुग्राय भीमाय ध्वांताय धुनये सासहये वाभि
युग्वने विक्षिपाय च ७ उपाकरणप्रभृति कर्मपद्धतिस्तु एव सांगाः इंद्रदैवत्यस्यास्याः क्रियाः सत्पः ततो ब्राह्मणभोजनं॥ छ॥ आश्वयु
२

स्यां पौर्णमास्यां प्रवर्तकाः। तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वावसथ्याग्नौ कर्म। अग्न्युपवेशनादिआज्यभागान्ते विशेषः। सक्षीरं श्रपयन्ती दधि
मधुनोरुपकल्पनं। श्रपिताप्यः क्षीरमुत्सिच्य पायसश्रपणं। आज्यपयमनकुशानादायेनात्पायसदधिमधुघृतावपनं। आज्यभागान्ते
पायसेन दधिमधुघृतमिश्रेण पंचाहुतयः इंद्राय स्वाहा। इदमिंद्राय। इंद्राण्यै स्वाहा। इदमिंद्राण्यै। अश्विभ्यां स्वाहा। इदमश्विभ्यां। आश्व
युज्यै स्वाहा। इदमाश्वयुज्यै पौर्णमास्यै। शरदे स्वाहा। इदं शरदे। ततः पायसा देवस्विष्टकृते। ततो महाव्याहृत्यादि प्राजापत्यान्तान्वा हुत्वा
तः संस्रवप्राशनं। अग्नये दक्षिणादानं। ततस्थालीपाकाज्यपेष्वासिच्य ततस्सप्तदडपर्णं अञ्जलिनां जुहोति। पूर्णमसि पूर्णं मे भूयाः स्वाहेति
अनेन मंत्रेण। इदमग्नये। ततो दधिमधुघृतमिश्रस्य स्ववरोः प्राशयन् यजमानं गृह्याः अवेक्षंते आयात्विंद्रस्त्यनुवाकेन सूपप्रपातः स्वस्तिभिः सदानं
दर्शनं। ततो ब्राह्मणभोजनं। रात्रौ वत्ससंसर्गः। ॥ अथ सीतायज्ञोऽपि कुर्वतो व्रीहिकाले यवकाले च भवति। तत्र प्रथमप्रयोगे मा
तृपूजापूर्वकमाभ्युदयिकं श्राद्धं। क्षेत्रस्य पुरस्तादुत्तरतो वा प्रागुदगायतं चतुरस्रं स्थण्डिलं यत्र सस्यानामुपरोधो न भवति तत्र कर्तव्यः। ग्रामे वा शुचि
देशे स्यात्कर्षणं कृत्वा तत्र वा कर्तव्यः। क्षेत्राद्यमध्ये यत्र क्रियते तत्र पंचभूसंस्कारान्कृत्वा वसन्त्याग्नेः स्थापनं। अग्न्युपवेशनादि आज्यभागा
न्ते विशेषः। व्रीहिकाले व्रीहिसस्य

पौर्णिमा स्थ ४

१८

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म। तत्र प्रथमप्रयोगे मातृपूजापूर्वकं माभ्युदयिकं श्राद्धं कृत्वा वसथ्याग्नौ कर्म। ब्रह्मोपवेशनादि प्रु
शानांते विशेषः। शूर्पं। सकृत्। उत्कर। उपपात्रं। दर्वी। कंकतत्रयं। अंजनानुलेपनं स्रजश्चेत्युपकल्पनीयानि। आज्यभागांते तरे आघारौ
तपद्यहा। त्याहुतिद्वयं श्रवणाकर्मवत्। ततोऽपराश्चतस्र आज्याहुतयः। या जनाः प्रतिनंदंति रात्रीं धेनुमिवायतीम्। संवत्सरस्य या पत्नी सा
नो अस्तु सुमंगली स्वाहा। संवत्सरस्य प्रतिमां यां त्वा रात्रीमुपास्महे। प्रजां सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा। इदं रात्र्यै। संव
त्सराय परिवत्सरायेदावत्सराय वत्सराय कृणुते बृहन्नमः। तेषां वयं सुमतौ यज्ञियानां ज्योग्जीता अहता स्याम स्वाहा। इदं संवत्स
राय परिवत्सरायेदावत्सराय वत्सराय च। ग्रीष्मो हेमंत उत नो वसंतः शरद्वर्षाः सुवितं नो अस्तु। तेषामृतूनां शतशारदानां निवात
एषामभये स्याम स्वाहा। इदं ग्रीष्माय हेमंताय वर्षाभ्यः शरद्भ्यः। ततः स्थालीपाकेन चतस्रः। सोमाय स्वाहा। इदं सोमाय। मृगशिरसे स्वाहा। इदं
मृगशिरसे। मार्गशीर्ष्यै पौर्णमास्यै स्वाहा। इदं मार्गशीर्ष्यै पौर्णमास्यै। हेमंताय स्वाहा। इदं हेमंताय। ततः स्थालीपाकेन स्विष्टकृत्। ततो म
हाव्याहृत्यादि प्राजापत्यांतान् नवाहुतयः। प्राशनं। दक्षिणादानं। ततः स्रुवेणोपघातं शूर्पेण पुष्पौपानि क्षमगाप्रभृत्यानां जनांते श्रवणाकर्मवद्
ने। मार्जनांते तत्स्थौ बलिरिति विशेषः। रात्रौ मातृस्त्रिवत्सानां संसर्गः॥ ६॥ अथ स्तरारोहणं॥ तत्र प्रथमप्रयोगे मातृपूजापूर्वकं

भ्युदयिकं श्राद्धं कृत्वा स्वस्तरास्तरणं देवोपं चाभूर्सं स्कारान्कृत्वावसथ्याग्नेः स्थापनं। अग्निमपरेण स्वस्तरास्तरणं। स्वस्तरस्योपर्य
हतस्य वाससः स्तरणं। अग्नेर्दक्षिणतो ब्रह्मोपवेशनं। उत्तरतः उदपात्रं शमी शाखा वाशीतालोष्ठाश्मनां निधानं। स्वस्तरमपरेण स्थितो भवति गृह
पतिः। मुत्तरेण पत्नी। तस्या उत्तरेणापत्यानि यथाकनिष्ठं। ततो गृहपतिरग्निमीक्षमाणो जपति। अयमग्निर्वीरतमोऽयं भगवत्तमः स
हस्रसातमः। सुवीर्योऽयं श्रैष्ठ्ये दधातु नाविति। त्वेतं मंत्रं। पश्चादग्नेः प्राङ्मुखं अञ्जलिं करोति। दैवीं नावमिति तिसृभिरित्यनेन मंत्रेण मध्वार
आर्ध्वं सिसृक्ष इत्येतैर्दैत्येन। ब्रह्मण्वत्यवरोहामेति ब्रह्मामंत्रेण। अत्यवरोहन्ध्वं मिति ब्राह्मणश्च तत्पत्न्यनुज्ञादानं॥ ओं अनुज्ञाताः सर्वे स्वा
ता अहतवाससः स्वस्तरमारोहति। आयुः कीर्तिर्यशो बलमन्नाद्यं प्रजामित्यनेन मंत्रेण। स्त्रीणाममंत्रमारोहणं मंत्रपाठः। ततः उपनीनां
र्पयति। सुहेमंतः सुवसंतः सुग्रीष्मः प्रतिधीयतां नः। शिवा नो वर्षाः संतु शरदः संतु नः शिवा इत्यमुं मंत्रं। स्योना पृथिवि नो भवेत्येतयर्चा दक्षि
णपार्श्वैः प्राक्शिरसः स्वस्तरे संविशंति। दक्षिणतः स्वामी जायोत्तरा। यथाकनिष्ठमुत्तरमित्यनेनैव क्रमेण। सर्वेषां संवेशने मंत्रपाठः।
ततः उत्तिष्ठंति। उद्गायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्त धामभिरित्यनेन मंत्रेण। सर्वेषामुत्थापने मंत्रपाठः। तद्वृस्थानीतु
वारद्वयमेतदेव कर्म भवति। तत आरभ्य सर्वे चतुरो मासानधः शायी रन्ने स्वेच्छया धाराशायी रत्न॥ ॥छ॥ ॥ मार्गशीर्षद्वितीय कृष्णाष्टम्या ३५

प्रथमाष्टका। तत्र प्रथमप्रयोगे मासश्राद्धपूर्वकमाभ्युदयिकश्राद्धं। अष्टकाकर्म मुके चिदाभ्युदयिकं श्राद्धं नेच्छंति। आवसथ्याग्नौ कर्म। ब्रा
ह्मणोपवेशनादि आज्यभागांते विशेषः। तंडुलान्नं तत्र सिद्धं स्थूप आसाद्य तां प्रोक्षयेत पूर्वोक्तेन कालेन। आज्यभागानंतरं त्रिंशच्छरावसारद्वये
मोघादक्षिणाकृतयः। त्रिंशच्छरावसारद्वये मांतान स्थूलसमानं केतुं प्रतिमुंचमानाः। ऋतूंश्च स्तन्वते कवयः प्रजानवंती मध्ये छंदसः परियंति
भास्वतीः स्वाहा। इदमृतुभ्यः। १। ज्योतिष्मती प्रतिमुंचते नभो रात्री देवी सूर्यस्य व्रतानि। विपश्यंति पशवो जायमाना नानारूपा मातुरस्या उप
स्थे स्वाहा। इदं रात्र्यै। २। एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिंद्रं। तेन दस्यून्व्यसहंत देवा हंतासुराणामभवच्छचीभिः
स्वाहा। इदमष्टकायै। ३। अनानुजामनुजां मामकर्त सत्यं वदंत्यन्विच्छ एतत्। भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति माप्रयु
क्त स्वाहा। इदं दशरात्रीभ्यः। ४। अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधं। भूयासमस्य सुमतौ यथा यूयमन्या वो अन्या
मतिमा प्रयुक्त स्वाहा। इदं रात्रीभ्यः। ५। पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोनु पंच। पंच दिशः पंचदशेन क्लृप्ताः समानमूर्ध्नी
रभि लोकमेकं स्वाहा। इदं रात्रीभ्यः। ६। ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति। सूर्यस्यैका चरति निष्कृतेषु
घर्मस्यैका सवितैकां नियच्छतु स्वाहा। इदं रात्र्यै। ७। या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे। सा नः पयस्वती धुक्ष्वोत्तरामुत्तरां समां स्वा

हा। इदं दंष्ट्राभ्यै। ८। शुक्रऋषभा नानानमसा ज्योतिषोगा द्विश्वरूपो शबलीरग्निकेतुः। समानमर्थं स्वपस्यमाना बिभ्रती जरा सजर
गुष आगः स्वाहा। इदं दंष्ट्राभ्यै। ९। ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानां। एका सती बहुधोषो व्युच्छस्य जीर्णा त्वं जरयसि
सर्वमन्यत् स्वाहा। इदं दंष्ट्राभ्यै १०। अथ स्थालीपाकेन तस्य आहुतयः। स्योना पृथिवीत्यादिभिर्मंत्रैः। स्योना पृथिवी शिवा मे तरिक्षं द्यौः
शान्नो घोरमभयं कृणोतु। शान्नो दिशः प्रदिश आदिशो नो होरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा। इदं पृथिव्या अंतरिक्षाय दिवे दिग्भ्यः
प्रदिग्भ्यः आदिग्भ्यो होरात्राभ्यां च। आपो परस्विनीः परिपातु सर्वतो थोतासमुद्रो अपहंतु पापं। भूतं च भविष्यच्च कृतं द्विश्वमस्त्वनेत्रो
भिगुप्तः सुरक्षितः स्याः स्वाहा। इदमद्भ्यो मरुद्भ्यो यात्रे समुद्राय ब्रह्मणो वा रुविश्च आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च नक्षं
तु। प्रजां श्रुजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहा। इदं विश्वेभ्यो आदित्येभ्यो वसुभ्यो देवेभ्यो रुद्रेभ्यो मरुद्भ्यः
प्रजापतये परमेष्ठिने च। ३। अष्टकायै स्वाहा। इदमष्टकायै। ४। अथ यूपेन एकाहुतिः। इंद्राय स्वाहा। इदमिंद्राय। ५। ततः स्थालीपाकेन
रूपया समायाः स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यांतं नव आहुतयः। ग्रासाशनांते दक्षिणादानं॥ ॥ ७। अथो चष्टका
कर्मावसथ्याग्नौ परिहत्तेत्यनित्यवैश्वदेवानंतरमपराह्णे प्राचीनावीतिकरणं। नीवीबंधनं। दक्षिणामुखकरणं। दक्षि

णा संस्तरणमपसव्यं परिस्तरणं। पात्रासादनं दक्षिणासंस्थं। स्रुक्कुंभसरूवी। स्रुक्पक्षे स्रुगमनंतरं चरुस्थाली। ततउदकं। आज्यमेक्षणी
स्पयं। उदपात्रं सकृदाछिन्नानि सव्ययोः पार्श्वसंस्था मांसं। सुरा। सक्तवः। अंजनानुलेपनं स्रजश्च। स्रुच्यादिनाभिन्यपूर्व
मेव। अवरवंत्यलक्ष्मणां सीस्यग्रहणोस्कृचि। बरौवा। ततश्चरोरधिश्रयणं। अभिघारणं। दक्षिणात उद्वासनं। पूर्वेण परणो। मे
क्षणेनाकृतद्वयं। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। अग्नो मेक्षणप्रासनं। अग्निमपरेण दक्षिणोदू वा रेखा
द्वयकरणं। अपहता इत्यनेन मंत्रेण। अपहता इत्यनेन उदकोपस्पर्शनं। ततो लेखयोः पुरस्तादुल्मुककरणं। ये रूपाणीति मंत्रेण।
उदकोपस्पर्शनं। ततः प्रथमलेखायां पितृपितामहप्रपितामहानां नामवचनेन मम अमुकावनेनिक्ष्वेति। ततो द्वितीयलेखायां मा
तृपितामही प्रपितामहीनां नामवचनेन। अमुकि अवनेनिक्ष्वेति। ततो लेखयोः पृथक्सकृदाछिन्नास्तरणं। प्रथमलेखायां पितृ
प्रभृतिभ्यो मासपिंडदानं। पितरमेमुकशर्मन्नेतत्ते मांसं स्वधेति। एवं पितामहप्रपितामहयोः। ततो द्वितीयलेखायां मातृपि
तामहीभ्यो मांसपिंडदानं। आचार्यंतितीवासिभ्यश्चानपत्येभ्यः स्त्रीपिंडसंनिधाने मांसपिंडदानं। स्त्रीपिंडसंनिधाने
अंवद्रवनं। अवदृष्टं सुरासेवनं। अमुकि सुरां पिबस्वेति मातृप्रभृतिभ्यः। ततस्तत्परखेन मातृप्रभृतिभ्यः प्रत्यवटं सक्तुप्रक्षे

पः ॥ ऽपमुकिदे अजस्वेत्यं जमादानं अमुकदेऽअनुलिपस्वेत्यनुलेपनदानं ॥ मास्त्रभ्रातृप्रपितामह ॥ पर्यन्तं अमुकदेस्वऽज्ञोपिभह्युस्वेतिसुमनसोदा
नं मातृप्रभृतिभ्यः ॥ सुराक्षमादिस्त्रगृहीतं स्त्रीभ्यएव ॥ अत्रपितरइतिजपः ॥ आतमनाइदमासनं ॥ अक्षुत्यामीमदंतेतिजपः ॥ पुनूरवनेजनं पि
ण्डप्रभृतिपितामहीपर्यंतं ॥ नीवीविस्रंसनं ॥ नमोवइत्यंजलिकरणं ॥ एतद्वःतस्तेत्यादिना मन्यतमस्यदानं ॥ ऊर्जंमित्यपोनिषेकः ॥ उत्स्वा पां
पिंडावधानं ॥ अवघ्राणं ॥ अग्नौसकृदाछिन्नप्रासनं ॥ उल्मुकयोश्चप्रासनं ॥ उदकोपस्पर्शनं ॥ ॥ ॥ ७ ॥ पौषस्यकृष्णपक्षस्यां द्वितीयाष्टका ॥ तत्रमा

३२

त्स्यूनापूर्वकमाभ्युदयिकंश्राद्धंकृत्वा वसथ्याग्नौकर्म ॥ ब्रह्मोपवेशनं ॥ प्रणीताप्रणयनं ॥ परिस्तरणं ॥ पात्रासादनं ॥ पवित्रच्छेदनाग्निरावपवित्रे ॥ प्रोक्षणी
पात्रं ॥ आज्यस्थाली ॥ चरुस्थाली ॥ दर्वी ॥ संमार्गकुशाः ॥ उपयमनकुशाः ॥ समिधः ॥ स्रुवः ॥ आज्यं ॥ अपवपाश्रपण्यौ ॥ अष्टकाचरुतंडुलाः अपूपार्थं उरवा ॥
पाशुकचरुतंडुलाश्चविलेपकल्पमीयानि ॥ छेदनशाखा ॥ पलाशशाखा ॥ त्रिगुणरशना ॥ उपाकरणार्थं ॥ द्विगुणरशना ॥ पशुः ॥ पान्नेजनी ॥ असिः ॥
हिरण्यशाकलौ ॥ षट् ॥ छ्ष जाड्यार्थंदधियोगः ॥ पवित्रकरणादिप्रोक्षणीं कृत्वा विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामीति पाशुकचरुतंडुलानां
प्रोक्षणं ॥ आज्यनिर्वापनं ॥ तरमष्टकाचरुपात्रेतंडुलप्रक्षेपः ॥ ततः पाशुकचरुपात्रेतंडुलप्रक्षेपः ॥ आज्याधिश्रयणं ॥ अष्टकाचरोरधिश्र
यणं ॥ पाशुकचरोरधिश्रयणं ॥ पर्यग्निकरणं ॥ स्रुवप्रतपनादिप्रोक्षणपर्यन्तं ॥ छेदनशाखास्तरणं ॥ अग्निंपरिस्पपूर्वपापमलानां

रवानिखननं ॥ परिव्ययणं ॥ विश्वेभ्योदेवेभ्यो उपाकरोमीति पशूपाकरणं ॥ द्विगुणरशनाशृंगान्तराभ्यांगवंधनं ॥ विश्वेभ्योदेवेभ्यो नियुनज्मीतिपशु
योजनं ॥ विश्वेभ्यस्त्वादेवेभ्योजुष्टंप्रोक्षामीति प्रोक्षणानुज्ञा तस्यप्रोक्षणं ॥ अस्योपग्रहणं ॥ अधस्तादुपोक्षणं ॥ उपयमनकुशाहोमी समिधःप्रक्षेपः
पर्युक्षणं ॥ अन्वारब्ध आघारद्वयं ॥ पशुसमंजनं ॥ ललाटादिस्थ्यापिशु ॥ प्रज्ञातांजनी ॥ असिस्रुवाभ्यां ललाटोस्पर्शनं ॥ पर्यग्निकरणं पश्वोऽध्वना
रवाग्नीनां ॥ प्रास्योल्मुकं ॥ तावत्प्राप्ति परिगमनं ॥ तृणादृष्टमादाय पुरुषं कृत्वा वपाश्रपणीभ्यां अन्वारब्धुस्योदग्गमनं ॥ तृणास्तरणं ॥ तस्मिन्स्थ
पिंगस्सःप्राक् शिरसोवोदक्पादस्यसंगृहीतमुखस्यसंज्ञपनं ॥ कृत्वा वदास्पसंस्कृत्य स्वाहादेवेभ्यइतिहोमः संज्ञप्तेचेभ्यः स्वाहेति ॥ जुहोति सुकृते
नैवाज्येन ॥ अपाराः पंचाहुतीः स्रुवेणजुहोति ॥ इदंप्रजापतयइति ॥ नोसांत्यागः ॥ वपाश्रपणीभ्यांनियोजनीमोक्षः ॥ पान्नेजनीभिः पशोः प्राणादीनि ध
नं यथोक्तं ॥ पश्चात्पशोर्निषेकः ॥ नैस्वयमेवकरोति ॥ उत्तानपशुकरणं ॥ नाभ्यग्रेणतृणान्निधानं ॥ प्रज्ञातयासिनाविधानं ॥ तृणमूलस्योत्सेपतो ॥ लोहितेन
नं ॥ निरसनं ॥ लोहितोनिरसने केचिन्नेच्छंति ॥ वपोत्खेदनं ॥ वपाश्रपण्यां प्राणादायप्रोर्णवनं ॥ परिवासनं ॥ वपोद्धरणं ॥ अभिघारणं ॥ वपाश्रपणादानं ॥
तृणाग्रस्याग्नौप्रासनं ॥ उत्तरतस्तिष्ठतो वपांप्रतप्य शाखयाग्न्योरंतरेण हृत्य दक्षिणतः श्रपणं ॥ अभिघारणं ॥ प्राणदानं ॥ आसादनं ॥ आ
लेपः ॥ आज्यस्थालीहोमो नत्रिपृष्ठेशाखसाराइति दशाभ्याहुतयः ॥ अष्टकाचरुपाशोस्पृष्टिपृथिवीत्यादयः स्विष्टकृतः ॥ ततो वपाहोमः स्रुवउपस्तरणं ॥
हिरण्यशकलावधानं ॥ वपाग्रहणं ॥ उपरिष्टाद्धिरण्यशकलावधानं ॥ द्विरभिघारणं ॥ वरुणवपामिमीतप्राचीनावीतिनोदक्षिणामुखस्यवपाहोमः इदं पि

हृत्यः। जातवेदस इति वा त्यागः। यज्ञोपवीती भूत्वा उदकोपस्पर्शनं। वपाश्रपण्योरग्नौ प्रासनं। पशोर्विशसनं। हृदयादिसर्वावदानपहरणं। त्रया
णां पश्वानां वा ग्रहणं। शूलहृदयप्रतर्दनं। अवदानाधिश्रयणं। अवदानप्रक्षेपः। त्रिः प्रसूते उपरि हृदयकरणं। पृषदाज्येन हृदयाभिधारणं। इ
तरेषामवदानं। नामाज्येनाभिधारणं। त्र्यंगवर्जं। उखो प्रासनं। प्राणदानं त्र्यंगवर्जेषु। शाखाम्यां तदेवाहरणं। आसादनं। त्र्यंगावर्जं
मालं ततः प्रधानहोमे कुशतप्रस्तीर्य हिरण्यमवपायां द्विर्विरवदानग्रहणं। स्थाली पाकोऽप्येवं सकृत्। पुनर्हिरण्यावधानमभिघारणं। अ
सर्वावदानपक्षे कृतात्र्यंगः। विश्वेभ्यो देवेभ्यः स्वाहेति होमः। स्विष्टकृद्धोमे स्रुवे उपस्तरणं। हिरण्यावधानं। त्र्यंगेभ्यो द्विर्द्विरवदानग्रहणं।
सर्वपक्षे असर्वावदानपक्षे तेभ्य एव यथानार्थेभ्यः सकृत्सकृदवदानग्रहणं। वरुद्ध्या ग्रसकृत्सकृदवदान ग्रहणं। हिरण्यावधानं। द्वि
रभिघारणं। अग्नये स्विष्टकृते स्वाहेति होमः। महाव्याहृत्यादि प्राजापत्यांतानवाहुतयः। सं स्रवप्राशनांते ब्राह्मणपश्वंगदानं। अस्याश्व
गोमीसनभोजनं चाष्टकाकर्म पूर्ववत्॥ ॥ माघकृष्णाष्टम्यां तृतीया प्राजापत्याष्टकावत्। तत्र कालशाकचरुः। सिद्धो पाद्ये पते ततो पू
पस्थानेन प्रजापतये स्वाहेति शाकचरुहोमः। समानमन्यत्। पूर्ववदन्वष्टकाकर्म। भाद्रपदकृष्णाष्टम्यां चतुर्थ्यष्टकापि प्राजापत्य
मायानवा। तत्र विशेषस्तु वरुस्थालीद्वयासादनं। तंडुलानंतरं कालशाकासादनं। कालशाकचरुसंबंधे येन कर्मासादनादि होमांतं

१८

लप्राचीनावीतिनो दक्षिणामुखस्य भवति। अन्यद्यज्ञोपवीतिनः प्राङ्मुखस्यैव। कालशाकचरुसंबंधे कर्म कृत्वोदकस्पर्शनं। अमूष्य
स्थाने पितृभ्यः स्वाहेति। शाकचरोराहुतिः। समानमन्यत्। अन्वष्टकाकर्म पूर्ववत्॥ ७॥ पुण्याहशालाकर्म। पुण्याहग्रहणं तदगाय
पनापूर्यमाणपक्षे ये। कृतादभ्यार्थं तत्रमात्पूजा सर्वकर्माभ्युदयिकं श्राद्धं। पूर्णाहुतिं वदाऽपश्चंसश्च स्तूपस्तंभस्थानावटेषु तेषु प्रत्यव
टं आग्नेयकोणादारभ्य होमोऽच्युताय भौमाय स्वाहेत्यनेन मंत्रेण। प्रत्यवटमंत्रवृत्तिः। इदमच्युताय भौमाय। अवटप्रत्यवटं तत्रौ शिला
स्थापनं। तदुपरि स्तंभो च्छ्रयणमिमामुच्छ्रयामि भुवनस्य नाभिमित्यनेन मंत्रेण। परिषिंचन्मनुष्ये यावसानइत्यर्द्धेन। इमामुच्छ्रयामि भुवन
स्य नाभिं वसोर्धारां प्रतरणीं वसूनां। इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा॥ अश्वावती गोमती सूनृतावत्युच्छ्रयस्व म
हते सौभगाय। आत्वा शिशुराक्रंदत्वागावो धेनवो वाश्यमानाः। आत्वा कुमारस्तरुण आवत्सो जगदैः सह॥ आत्वा परिस्रुतः कुंभ आदध्नः
कलशैरुप क्षेमस्य पत्नी बृहती सुवासा रयिन्नो धेहि सुभगे सुवीर्यम्॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव। अभिनः पूर्यतां रयिरिद
मनुश्रेयो वसानः। इत्यनेन मंत्रेण स्तंभवत्तु ष्टयोच्छ्रयणम् वरहोम क्रमेणेव। भेदेन प्रतिस्तंभमंत्रपाठः। स्तिता भावे अनेन वंशमंत्रेण। त्रुत्यव
शिलास्थापनं। अत्रैव निधन्नायां शालायां गृहाभ्यंतरतः पंचभूसंस्कारान्कृत्वा आवसथ्याग्नेः स्थापनं। श्रेतोपकेशानां दृशाशानां ते विशेषः।

ब्रह्मोपवेशनान्तरं मग्नेरुत्तरतः उदपात्रस्थापनं। ततः प्रणीताप्रणयनं। नादि स्थालीपाकश्रपणं। प्रोक्षणमुत्पवनं। तेनि ष्क्रमणी। द्वारसमीप
पस्थित्वा ब्रह्मन्प्रविशामीति ब्रह्मामंत्रणं। प्रविशस्वेति ब्रह्मानुज्ञातः प्रविशति ऋतं प्रपद्ये शिवं प्रपद्ये इत्यनेनैव मंत्रेण। उपयमनकुशा
दानं। समिदाधानं। पर्युक्षणं। इत्यन्तातरि त्याज्याहुतिद्वयहोमः। इहरतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा। इदमग्नये। उपसृ
जं धरुणं मातरं धरुणो मातरं धयन् रायस्पोषमस्मासु दीधरत्स्वाहा। इदमग्नये। अपरांश्चतस्र आज्याहुतयः। वास्तोष्पते प्रतिजा
नीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा। इदं वास्तोष्पतये।१। वास्तोष्पते प्र
तरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व स्वाहा। इदं वास्तोष्पतये।२। वास्तो
ष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः स्वाहा। इदं वास्तोष्प
तये।३। अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः स्वाहा। इदं वास्तोष्पतये।४। ततः आधारावाज्यभागौ हुत्वा
स्थालीपाकेन जुहुयात्। अग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये। सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा। इदमग्नय इन्द्राय
बृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाज्यै च।१। सर्पदेवजनान्सर्वान् हिमवन्तं सुदर्शनं। वसूंश्च रुद्रानादित्यानी

शानं सह। एतान्सर्वान्प्रपद्येहं वास्तु मे दत्त वाजिनः स्वाहा। इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्य ईशाना
य सगणेभ्यश्च।२। पूर्वाह्णमपराह्णं चोभौ मध्यंदिना सह। प्रदोषमर्धरात्रं च व्युष्टां देवीं महापथीं। एतान्सर्वान्प्रपद्येहं वास्तु मे द
त्त वाजिनः स्वाहा। इदं पूर्वाह्णायापराह्णाय मध्यंदिनाय प्रदोषायार्धरात्राय व्युष्टायै देव्यै महापथायै च।३। कर्तारं च विकर्ता
रं विश्वकर्माणमोषधीश्च वनस्पतीन्। एतान्सर्वान्प्रपद्येहं वास्तु मे दत्त वाजिनः स्वाहा। इदं कर्त्रे विकर्त्रे विश्वकर्मण ओषधी
भ्यो वनस्पतिभ्यश्च।४। धातारं च विधातारं निधीनां च पतिं सह। एतान्सर्वान्प्रपद्येहं वास्तु मे दत्त वाजिनः स्वाहा। इदं धात्रे
विधात्रे निधीनां पतये च।५। स्योनं शिवमिदं वास्तु दत्तं ब्रह्मप्रजापती। सर्वाश्च देवताः स्वाहा। इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देव
ताभ्यश्च।६। अथ स्थालीपाकेन स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यान्ता नवाहुतयः। संस्रवप्राशनं। ब्रह्मणे दक्षिणा
दानं। ततः उदुम्बरपत्राणि संक्षीराणि दूर्वा गोमयं दधि मधु घृतं कुशा यवाश्च एतानि सर्वाणि एकस्मिन् पात्रे कृत्वा आसनोपस्था
नेषु प्रोक्षणं करोति। आसनानि नाम गृहादिस्थानानि। उपस्थानानि उपस्थानदेवतास्थानानि। तानि स्थानानि प्रोक्षति। त्वयि
अथ सूत्रेण संधाय अभिमर्शनं करोति। आशाश्च त्वा यत्राश्च सर्वे संधो गोपाये तामित्यनेन मंत्रेण ततो रक्षिणी संधीय विभिन्नवति। यद्द्भ्य

लादक्षिणाश्च दक्षिणे संधौ गोपायेतामिति। पश्चिमे संधौ वृत्तिमृशति। अन्नं वलाब्रलिणाश्च पश्चिमे संधौ गोपायेतामिति उत्तरे संधौ
ऋभि मृशति। ऊर्जा वाससृनृता चोत्तरे संधौ गोपायेतामिति। अथ गृहान्ति स्कम्भादिषूपतिष्ठते। प्रपद्यमाणो मैत्रेयं यथालिंगं। केताय
सुकेताश्च पुरस्ताज्जो पायेतामित्यग्निर्वै केतादित्यः सुकेतस्तौ प्रपद्ये ताभ्यां नमोस्तु तौ मा पुरस्ताज्जो पायेतामित्यनेन मंत्रेण प्राचीं दिशमुप
तिष्ठते। गोपायमानं च मा रक्षमाणाश्च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानं रात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोस्तु
मा दक्षिणतो गोपायेतामिति। दक्षिणामुपतिष्ठते। दीदिविश्च जागृविश्च पश्चाज्जो पायेतामित्यन्नं वै दीदिविः प्राणो जा
गृविस्तौ प्रपद्ये ताभ्यां नमोस्तु तौ मा पश्चाज्जो पायेतामिति पश्चिमामुपतिष्ठते। अस्वप्नश्चानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्र
मा वा अस्वप्नो वायुरनवद्राणस्तौ। प्रपद्ये ताभ्यां नमोस्तु तौ मोत्तरतो गोपायेतामिति उत्तरां दिशमुपतिष्ठते। समाप्तायां रूपा
त्रायां प्रवेशनं। धर्मस्थूणाराजं श्रीस्तूपमहोरात्रे द्वारफलके। इन्द्रस्य गृहा वसुमंतो वरूथिनस्तानहं प्रपद्ये सह प्रजया
पशुभिः सह। यन्मे किंचिदस्त्युपहूतः सर्वगणसखाय साधु संवृतः। तौ त्वा शालेऽरिष्टवीरा गृहा नः सन्तु सर्वत इत्यनेन मंत्रेण ततो
ब्राह्मणभोजनं॥ ॥ अथ मणिकावधानं॥ तत्रानसंध्यादिने मालपूजापूर्वकमाभ्युदयिकं श्राद्धं। ततोभ्यादाने दैवस्य

स्यादेना आददेनार्यसी इत्यनेन मंत्रेण। शालाया उत्तरपूर्वकोणे अवटपरिलेखः। इदमहं रक्षसां ग्रीवा अपि कृन्तामीत्यनेन मंत्रे
णात्तस्कोपस्पर्शनं। अवटखननं। प्रांशुःपांसूद्वपनं। अवटस्योपरि कुशास्तरणं। अक्षतानां रिक्तकाभमनमम्पुष्पोच्चमे गतानाम्
सिद्धार्थकादीनामवटे आवपनं। अवटे मणिकास्थापनं। समुद्रोसि नभस्वानार्द्रदानुः शंभूरित्येतावता मंत्रेण। मणिके अप आसि
ञ्चति। आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृताम्‌तं च। रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात्‌ इत्यनेन मंत्रेण।
पुनरप आसेके आपो हि ष्ठेति तिसृभिर्ऋग्भिः। ततो ब्राह्मणभोजनं॥ ॥अथ शीर्षरोगभेषजं॥ ॥तत्र पाणी प्रक्षाल्य स्रुवौ विमार्जि
नं पाणिभ्यामेव। वध्वा स्थाल्यां ब्रीहियवान् गोदानां शुष्कोदधि। यद्भूमं इन्द्रशीर्षण्यं राटापाहं वृहामीत्यनेन मंत्रेण। अन्ते शीर्षरो
गाणी प्रक्षाल्य एकस्यां स्रुवो विमार्जनं। दक्षिणेन पाणिना। अवत्ते द्विरुकापि स्रुपाप्लवं श्वेतपक्षमेहायन्ताः। अथाश्वपञ्चशिरोमास्यां
नाश्चेवादित्यनेन मंत्रेण॥ छ॥ अथ दुष्टनीतस्य भृत्यान्तशीलस्य दासस्य वशीकरणं। तत्र यदा दासः स्वपिति तदाजीवतः पत्योपि पादः
स्वकीयमूत्रमासिञ्च्य वासं मध्ये कृत्वा विषाणस्थे मूत्रमपसव्यं त्रिः परिषिञ्चन्नुपरियात्। परि त्वा गिरेरहं परिक्रामपरि स्वसुः। परि वि

५०

श्रुत्वा ले त्रोऽश्म सरव्येभ्यो विसृज्याम्यहं । तत्र लपरीमीनौ सिपिमीठः कगामिषासीत्यनेन मंत्रेण । मध्यमं मंत्रेण [illegible] ॥ ॥ सापद्यते नापि
कर्मणा नेवृद्ध्यो न वा पुनः शुचिच्छयान्ते तिलदा कर्मांतरं वशीकरणार्थमुच्यते । पंचभूसंस्कारान्कृत्वादायाग्नेः स्थापनं । ततो ब्रह्मोपवे
शनादि पर्युक्षणांतं तं स्थालीपाकवर्जम् । पर्युक्षणांते आ[illegible] घारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं
स्विष्टकृत्वेनाज्यतु द्रव्यान्तुतयः । स्विष्टकृदंते हुताकामिमंत्रीणि वृक्षोग्रानि जुहोति सकृदेव । परिसमूहनादि वलानि कृते नव
ग्रहः इध्मपाशो नसि त्वामहमनु त्वाथान्पमानयोः स्थापनेन मंत्रेण इदं मित्रायु । ततः संस्रवप्राशनं । ब्राह्मणेभ्यो दक्षिणादानं ॥ ॥ [illegible]
मूलगावः पशुपुत्रधनयश आयुः कामानां तत्र मालक्ष्मा पूर्वकमाप्नुदृपिकं श्राद्धं । औपासनमादायारण्यगमनं । पुर्वो दर्श
वभूसंस्कारान्कृत्वा दक्षिणाग्नेश्च आहवनीयं दक्षिणेन ब्रह्मोपवेशनं । उत्तरतः प्रणीताप्रणयनं । पवित्रे छेदनानि पवित्र प
कुशौ । प्रोक्षणीपात्रीपुत्र । अंतर्धानं तयोर्वै त्येत पामासादनं । रग्रुचौ कुशाम्याभ्यिपुरीपाहरणो दकसिकता धावदनानि
पकल्पनं । पवित्रकरणं । प्रोक्षणी संस्कारः । पञ्चौतद्धानतृणं वा प्रोक्षणं । वज्रमादाय वेदिमानं संमर्जनीते रचयेत्कर्तीकारेकक

५१

५२

कार्श्च पदार्थाः । अथ तेभ्यः चाप्ययोक्याः । समाम्नायाभावात् शाम्यादाता धुलरवेदिच्छादनं तं । पंचगृहीताग्नि प्रणायनमुप
यमस्युपलवापनं तं । ब्रह्मणः प्रणीयमानानुगमनं । प्रणीतानोबाचोहरणं । आहवनीयगार्हपत्ययोः परिस्तरणं । पात्रासा
दनं । आज्यस्थाली । संमार्गकुशाः । सन्नहवनावृच्छादनानि । परिधयः उपयमनकुशाः । समिधः । स्रुवः । आज्यी पे पात्रपण्यो ।
चरुस्थाली मुसलं उरव । तंदुलाः तुल्यवयागोश्चेति । उपकल्पनीयानि । बर्हिः । प्लक्षशाखा । पलाशशाखा । त्रिवृत्सरशाना । वपाक
रणतृणा द्विगुणरशना । गोपशुः । असिः । पात्नेजनी । दधिहिरण्यशकलानि । पत्नीपात्राणि चेति । पात्रप्रोक्षणं । रुद्रायत्वा प्रो
क्षामीति तंदुलानां प्रोक्षणं । आज्यनिर्वपणं । गार्हपत्ये अधिश्रयणं । पर्यग्निकरणं । वेदिखननं । उत्तरपरिग्रहः । अनुमार्जनकर्म आ
हवनीयमपरेणाग्रे क्षण्यासादनं । पाण्योरवनेजनं । प्रणीतानामपरेण स्फ्येध्माबर्हिषोरासादनं । स्रुवप्रतपनं । संमार्ग्य प्रोक्षणं ।
पुनः प्रतपनं । निधानं । आज्योद्वासनं । प्रोक्षणीनामपरेण कृत्वोत्पवनं । अवेक्षणं । प्रोक्षण्युत्पवनं । वेदिप्रोक्षणं । बर्हिः प्रोक्षणं ।
मूलापसेकः । एकदेशा बर्हिर्विस्रंसनं । सन्नहनविस्रंसनं । प्रोक्षण्यां निधानं । अन्येरवधारणं । वेदिस्तरणं । प्लक्षशाखास्तरणं । आह

रनीयकल्पनं। परिधिपरिधानं। आहवनीये द्वापांने अग्रेणाहवनीयं परीत्य शाखानिखननं। नात्र यूपावटे वत्। निखननमंत्र
मेवापरिश्रपणं। शाकलोपगूहनं। रुद्रायोपाकरोमीत्युपाकरणं। अंतरा शृंगबंधनं। रुद्राय त्वा नियुञ्ज्मीति शाखायां नियोजनं। रुद्राय
प्रोक्षामी प्रोक्षणं। अस्यो पयग्रहणं सशेषं। अधस्तादुद्ग्रोक्षणं। उपयमनकुशादानं। समित्प्रक्षेपः। प्रोक्षणीभिःपर्युक्षणं। स्रुवाघारः।
उत्तराघारः। पशुसमंजनं ललाटांसश्रोणिषु। स्रुवं सिना ललाटोपस्पर्शनं। शामित्रपरिलेखश्चात्वालमुत्तरेण। पर्यग्निकरणं।
आहवनीये उल्मुकस्य पुनःप्राशनं। तावत्प्रतिगमनं। पुनराहवनीयादुल्मुकादानं। पशुं कंठे बध्वा वपाश्रपणीभ्यां अन्वारब्धस्योद
ङ्नयनं विदित्वाण दयादानं। शामित्रेग्निनिधानं। शामित्रस्य पश्चात्पुणाज्जरणादिवपोद्धरणाभिघारणांतं। वपाप्रक्षालनं। प
शुस्वीचासनं हृदयाद्यवदानग्रहणं। सर्वेषां त्र्याणां पचानीवा। आग्नीध्र ग्रहणं। श्वभ्रऊवध्यावधानं। लोहितस्य च। चरो तंडुलाव
पनं। वपायाः शामित्रे प्रतपनं। आहवनीयस्योत्तरतस्तिष्ठत आहवनीये प्रतपनं। शाखाग्न्योरंतरेण हत्वा दक्षिणतो वपाश्रप
णी। गार्हपत्ये चरुस्थालीपाकस्य श्रपणं। शामित्रे हृदयादीनामवदानानां श्रपणं। चरोश्च पर्यग्निकरणं। वपाभिघारणं। चित्र
स्रुतउपरि हृदयकरणं। पृषदाज्येन हृदयाभिघारणं। इतरेषामाज्येन। सर्वाणि चेत्। अंगवर्जमभिघारणं। स्थालीपाकस्योद्वासनं।

उखायाउद्वासनं। वपाया अंगानां च प्रागदानं। वपादीनामासादनं। अंगानि च शाखाग्न्योरंतरेण हत्वा वेद्यामासाद्य वपायाः
अंगानां चालेपनं। अन्वारब्धे आज्यभागद्वये। वपाहोमे स्रुवउपस्तरणं। हिरण्यावधानं। वपाग्रहणं पुनर्हिरण्यावधानं। हिरभि
घारणं। रुद्राय स्वाहेति वपाहोमः। वपाश्रपण्या अग्नौ प्रासनं। उखातो वसां गृहीत्वा अंतरिक्षाय स्वाहेति वसाहोमः। अवदानहोमे तु
स्रुवउपस्तरणं। हिरण्यावधानं। प्रधानावदानेभ्यो द्विर्द्विरवदानग्रहणं। स्थालीपाकाच्चसकृत्। पुनर्हिरण्यावधानं। अभिघारणं।
अप्सर्वाणि चेद्भागतोभ्यंगः। अग्नये स्वाहेति होमः। पुनः स्रुवउपस्तीर्य हिरण्यमवधाय प्रधानावदानेभ्यो द्विर्द्विरवदाय स्वरो
सकृदवदाय हिरण्यमवधायाभिघाय रुद्राय स्वाहेति होमः। एवमेव सर्वहोमेष्ववदानग्रहणं मीढानीं। शर्वाय स्वाहा पशुपतये
स्वाहेति उग्राय स्वाहा। अशनये स्वाहा। भवाय स्वाहा। महादेवाय स्वाहा। ईशानाय स्वाहा। एवमग्न्यादयो नव प्रधानहोमाः। पृष
दाज्येन वनस्पतये स्वाहेति होमः। स्विष्टकृद्धोमे तु स्रुवउपस्तीर्य हिरण्यमवधाय सर्वपक्षे अंगेभ्यो द्विर्द्विरवदाय। चरोश्च सकृदव
दाय असर्वपक्षे तेभ्य एव प्रधानेभ्यो द्विर्द्विरवदाय चरोश्च सकृदवदाय हिरण्यमवधाय द्विषरभिघार्य अग्नये स्विष्टकृते स्वाहेति
होमः। दिग्व्याघारणं। गार्हपत्ये जाघन्या पत्नीसंयाजाः। जाघन्याश्चतुरवदाय अवदाय स्रुवेण होमः। नाचसंस्रवावनयनं। ईशान्ये स्वाहा

४३

सर्वपेस्वाहा० भवनाय स्वाहा० भवस्येस्वाहा० अग्नये गृहपतये स्वाहा० एताः पैत्र पत्नीसंयाजा कृतः। ततआहवनीये महाव्याहृत्यादि प्राजाप
त्यांतान वाकृतयः। संस्रवप्राशनं। शूलगवपशुनातुल्यवयस्कागो ब्राह्मणाय दक्षिणादानं। पलाशपत्रेषु चतुर्षु कसिंश्चिदुदक संस्थं
शुक्लोहितेन बलिहरणं। यातेरुद्र पुरस्तात्सेनास्तासु तामेष बलिस्ते। अस्तेन मः
यातेरुद्र दक्षिणतः सेना यातेरुद्र पश्चात्सेना ० यातेरुद्र उत्तरतः सेना ० यातेरुद्रोपरिष्टात्सेना ० यातेरुद्र धस्तात्से० ६ इदंरुद्राय
सेनाभ्यःप्रतिसर्वबलिषु त्यागः। ध्रुवं ध्यं लोहितलिप्तमग्नौ प्रासनं। अथ धर्मिरखननं च। अथैवा तेपशुमरक्षाप्य रुद्राध्याय
स्थानं। रुद्राध्यायस्य प्रथमांतरमाभ्यां वानुवाकाभ्यामुपस्थानं। नमस्तु इतिषोडशर्चः प्रथमोनुवाकः॥ धर्मपत्नी धसस्वतरीति विंशाति
ऋजुत्वमः। उदकोपस्पर्शनं। नैतस्य पत्रो मांसस्य ग्रामानयनं॥ ७॥ ॥ अथगोयज्ञः स्वर्गादिकामस्य। तत्रमातृपूजादि पूर्वकर्माभ्युदयिक
श्राद्धं। परिसमूहनादि आज्यानं तं विशेषः। सक्षीरं घयणयनं। ततः पायसः श्रपणं। आज्यभागौ तेषु लगवदेवताभ्यो पादिदृग्गानीते
भ्योनवभ्यः। पायसेन होमः। ततः पायसा देवस्विष्टकृत्। तोमहाव्याहृत्यादि प्राजापत्यांतानवाहुतयः। ततः प्राशनं तं पूर्णपात्र
प्योरत्नतवस्त्रं अन्नपादानं॥ ॥ अथ वृषोत्सर्गं स्वर्गादिकामस्येव। स च कार्तिक्यां पौर्णमास्यां रेवत्यां वाश्वयुजस्य मध्ये वा। तत्रमा
तृपूजा पूर्वकर्माभ्युदयिकश्राद्धं। परिसमूहनादि आज्यानं तं विशेषः।

४४

अग्नये रुद्राय शर्वाय पशुपतये उग्रायाशनये भवाय महादेवायेशानायेति च ४

श्रपयनीतं दुग्ध अनेतरं पोक्षस्य पिष्टवरोः सिद्धस्ये वासादनं। प्रणीतेन पयसा पायस श्रपणं। पर्युक्षणं तेषु सुमिद्धो नोदुग्धानी
ति षडाज्याहुतयः। इहरतिः स्वाहा। १ इहरमध्वं स्वाहा २ इहधृतिः स्वाहा ३ इहस्वधृतिः स्वाहा ४ उपसृजं धरुणं मात्रे धरुणो मातर
धयन्स्वाहा। ५ रायस्पोषमस्मासु दीधरत्स्वाहा। ६ इदमग्नय इति षण्णामपि त्यागः। ततः पूर्वोधारादि भागौ तेपायसेनपूर्वो
क्त देवताभ्यो ग्न्यादि दृग्गानां तेन वेभ्यो होमः। अथ पिष्टचरोरेकाहुतिः। सभागाजच्चे पुनः पूषा रक्षं लवते। पूषा वाजं सनोतु नः स्वा
हा इत्यनेन मन्त्रेण। इदं पूष्णे। पायसपोष्णाभ्यां स्विष्टकृत्। ततो महाव्याहृत्यादि प्राजापत्यांतानवाहुतयः। संस्रव प्राशनं। पूर्णपात्रवरो
रन्न पात्रस्य ब्राह्मणेदानं। रुद्राध्यायजपः। अथ स्वर्णादिवर्णो वा यो वास्वगुणे मूर्धाच्छादयति यं वा यूथ समूहः स्वगुणैः छादयेत्। लोहितवर्णो
वा सर्वगिरूपैर्ताडी वत्सायाः पयस्विन्याः पुत्रो यूथे च श्रेयरूपवत्तमः। एवं गुणविशिष्टं वृषं वस्त्रमाल्यादिभिरलंकृत्य ततो यूथमध्ये
यासु रव्यश्चतस्रो वत्सतर्यौ विंति ताश्च वृषमाल्या दिरलंकृत्य तत मध्ये वृषं स्थाप्य। एवं युवानं पति वो ददामि तेन क्रीडंती च रतिप्रि
येण। मानः साप्तजनुषा सुभगा रायस्पोषेण समिषा मदेमे त्यतयर्चा उत्सृजेत्। ततस्तं वृषं वत्सतरीमध्यस्थं मयोभूरित्यनुवाकेन
अभिमंत्रयेत्। मयोभूरभिमावाहि स्वाहा। मारुतोसि मरुतां गणः इत्यादि अभ्यस्वर्णज्योतिः स्वाहा स्वर्ण सूर्यस्वाहा इत्येते तोनुवाके
नः॥ ॥ (७) ॥ अथ पायसप्राशनं नाम कर्मांतरं। तत्र मातृपूजादि पूर्वकर्माभ्युदयिकश्राद्धं कृत्वा स्वकीयानां सर्वासां गवां पयसि

४

दृष्टान्तो व्याख्यायते २

४४

पाय संभ्रष्य पित्वा त्रिः प्रसन्नति ब्राह्मणान्भोजयेत्। यथावा छागपशुं कुर्यात्तस्य धर्मोः प्रस्तावेन कर्म व्याख्यातं॥ ७॥ ॥अथोद
क कर्माख्यते। सूतकाशौचनिरूपणं स्मृत्यंतरेभ्यो ज्ञातव्यं। कर्ममात्रमुच्यते। गृह्यकारमतेन त्र्यब्दाद्वार्षिके प्रेतमरणपनीतानां मौ
निखननेत। द्विवर्षप्रभृति त्रितेऽस्मशानं नीयमानमनुगच्छेति। अनुउपेष्वपि किं पूर्वेता सर्वे सपिंडाः यमगाथां गायंतो यमसूक्तं जपं
तो गच्छतीत्येके मन्यंते। उपनयनादर्वाकू चेतस्य दाहमात्रं कुर्वंति। उपनयनोर्ध्वं भूमिजोषणादि आउदकांतगमनाद्यथा आहिता
ग्नेः क्रियते तत्तथैव कर्तव्यं यथासंभवं। तत्रावसथिकेनाग्निना दहेति समंत्रकं। ग्रामाग्निना अमंत्रकमितरमनावसथिकं। ततो
दाहसमाप्तावुदकांतं गत्वा समीपास्थितं श्यालकं वा उदकं वा चरन्तु सपिंडा उदकं कौ... मिदृ त्यनेन मंत्रेण। एवं याचितं वै याद्दिशतं द
र्भा दर्भाकुर्वेतो भवति। दृधुरूच्छेमा मै वेपुनरिखं सर्वे प्रतिवचनं ददृयात्। अथ चातवर्षोर्ध्वं प्रेतानुवर्तिता दधुरूच्छमेतावदय प्र
वचनं दद्यात्। तत आसप्तमात्पुरुषाद्दूरा मातृपुरुषात्सर्वे सपिंडाः समानोदकाश्च उदकमभ्यवयंति। एकग्रामवासे तु आसप्तमा
त्पुरुषाद्दूरामादूर्ध्वं नियमो नास्ति। किंतु यावत्सर्वं वानुस्मरणं तावत्सपिंडाः समानोदकाश्चोदकमभ्यवयंति। सर्वे एकवस्त्राः प्राचीना
वीतिनश्च भवंति। ततः सव्यस्य हस्तस्यानामिकयाउदकमपनोद्यापनेः सोऽमुक दृयामि त्वेनामगोत्रेण। ततो दक्षिणामुखास्तूष्णीं मद

३६

निमज्जंति। ततः प्रेतमुद्दिश्य अमुकगोत्रामुकशर्मन्प्रेत एतत्ते उदकमित्येकैकार्यं अंजलिनोदकं गृहीत्वा सकृत्सिंचंति। तत
काउत्तीर्णाः शुचौ देशे शाद्वले वा निषद्यैनान्पविष्टान् ज्ञातीनन्ये सुहृदस्तानेनमपवदेयुः इतिहासपुराणादिकथाभि
श्चित्रार्भिः संसारानित्यतां ख्यापयंतः तेषां शोकमपनयेयुरित्यर्थः। ततः पश्चादनवलोकयंतः कनिष्ठानपुरतः कृत्वा
पंक्तिसंस्थानेन ग्राममायांति। तत आगत्य गृहद्वारे स्थित्वा निंबपत्राणि दंतैश्छावखंड्य तत आचम्य उदकमग्निं गो
मयं गौरसर्षपांस्तैलं स्पृष्ट्वा अन्यथाक्रमेणालभ्य ततः पादेनाश्मानमाक्रम्य गृहं प्रविशंति। इतः प्रभृति त्रिरात्रं यावद
ज्ञातीनां नियमा [illegible] उच्यते। त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किंचित्कर्म कुर्युः न कारयेयुः क्रीत्वा अन्येभ्यः सुहृद्भ्यो
लब्धान्नं द्विवा भुंजीत। न रात्रौ। मांसं च नाश्नीत। पिच प्यपि ब्रह्मचर्यादयो धर्माः सामान्येन च त्रिरात्रमुक्तास्तथापि पुत्रादीना
मसन्निहितानां यावदाशौचमेव भवति। अथ वा सूत्रकारपक्षे त्रिरात्रमेवाशौचं भवति। न दशरात्रं। ततश्च अभ्यासः। अशौच
लक्षणार्थं त्रिरात्रग्रहणं। ततश्च यावदाशौचं सर्वेषां ज्ञातीनां ब्रह्मचर्यादयो धर्माः भवंति। अथ यस्तेषां मध्ये प्रेतं क्रिया

यामधिकारी पुत्रादिः सद्भारात्रैयावत् । प्रत्यहमेकैकं पिंडं प्रेतायदद्यात् । आशौचादिन हानौ एको वा दशैव पिंडदाने व्याविभागे
न । ततः पिंडस्थाने प्रथमसवनेजनं । अमुकगोत्र अमुकशर्मन् प्रेतावने निक्ष्वेति । ततो दर्भाँस्तीर्त्वा पिंडं दद्यात् । अमुकगोत्रामु
कशर्मन्नु प्रेत एष ते पूरकः पिंडो मया दीयत इति । ततः पुनरवनेजनं पूर्ववत् । अथानुलेपनादिदानं स्मृतं तरो क्रममपि कुर्यात् ।
एवं दशस्वपि पिंडेषु । अथ स्वाध्यायमपीईरन् यावदाशौचं । नित्यानि कर्माणि पंचमहायज्ञादीनि निवर्त्तेरन्यावत्तस्मिन्नहोरा
त्रे म[illegible] म्रियते तस्यास्तत्रो मृन्मयपात्रे क्षीरोदके कृत्वा पिप्पल्यादिना अवलंब्य धित्वा आकाशे धारयेत् प्रेतात्रस्नाहि त्यनेन
मंत्रेण । न स्वाध्यायमधीयीरन् यावदाशौचं । नित्यानि कर्माणि पंचमहायज्ञादीनि निवर्त्तेरन्यावदाशौचं । वैतानवर्जं शिलानसा
ध्यान्यग्निहोत्रादीनि कर्माणि न निवर्त्तेरन् । शालाग्नो चैके आचार्याः शालाग्निसाध्यानां कर्मणामनिवृत्तिमिच्छंति । एके तु निवृत्ति
मिच्छंति । यदा च शालाग्नि कर्मणामनिवृत्तिपक्षस्तदा तानि कर्माण्यन्ये ऋत्विगादयः कुर्वंति । न स्वयं कुर्यात् । एतच्च स्वाध्या
यवर्जनादि सूतकेपि द्रष्टव्यं । तत्रापि स्मर्यते । प्रेतस्पर्शिनः सपिंडाः ग्राममनप्रविशेयुः आनक्षत्रदर्शनात् । यदि दिवा मर
णं स्यात् । यदि रात्रौ मरणं स्यात् तदा प्रेतस्पर्शिनः सपिंडाः ग्रामं न प्रविशेयुः प्रागादित्यस्योदयात् । क्षत्रियस्य बाह्य सूत

तकैंसवति । वैश्यस्य पक्षी । शूद्रस्य मासः । आचार्ये प्रेत एवमेवोदकदानादि सर्वं प्रकर्तव्यं । मातामहीमातामहयोश्च प्रेतयोरेवमेवोद
कदानादि सर्वं कर्तव्यं । स्त्रीणामविवाहितानामेवोदकदानादिकर्त्तव्यं । विवाहितानां तु त एव भर्त्रादयः कुर्वंति तेषामपि सर्वं
दीनां ता अपि कुर्वंत्युदकदानादि । एकादशे हनि अयुग्मे श्राद्धे एकोद्दिष्टं श्राद्धं प्रेताय कुर्यात् । तच्च मासं सवत्सं कुर्यात् । ए
के तु प्रेतदेवताकं गोपशुं कुर्वंति ॥ छ ॥ ॥ इदानीमर्घ्यप्रस्तावः । कथ्यते । तत्राचार्ये गृहमागते अर्घाहरणादि कुर्यात् । लौकिकं
तं कर्म कृत्वा याग पशुस्वमार्गं स्थाप्य परिसमूहनादि पात्रासादनांतं कृत्वा पात्रासादनं । पवित्रछेदनानि । पवित्रे । प्रोक्ष
णीपात्रं । आज्यस्थाली । चरुस्थाली । संमार्गकुशाः । उपयमनकुशाः । समिधः । स्रुवः । आज्यं । वपाश्रपण्यौ । शूलं । उखा । तं
डुलाश्चैति । उपकल्पनीयानि । प्लक्षशाखा । पलाशशाखा । त्रिगुणारशना । उपाकरणार्थं पी । द्विगुणारशना । पशुः । पात्रेज्जनी ।
असिः । हिरण्यशकलानि । दार्वेति । पवित्रकरणादि प्रोक्षणपर्यंतं कृत्वा बृहस्पतये त्वा जुष्टं प्रोक्षामीति तंडुलप्रोक्षणं ।
प्लक्षशाखास्तरणं । पलाशशाखाभिः खननं । परिव्ययणं । बृहस्पतये उपाकरोमीत्युपाकरणं । बृहस्पतये नियुनज्मीति नि
योजनं । बृहस्पतये त्वा जुष्टं प्रोक्षामीति प्रोक्षणं । उपयमनकुशादानादि आज्यभागांते बृहस्पतये स्वाहेति वपाहोमः । बृहस्पत

यस्याहेत्यवदानहोमः पूर्ववत्स्विष्टकृदादिप्राशनांते। पश्चादंगप्रदानं। इममनुप्रापयेत्याद्या पथिभागप्रदानं। एवं सर्वार्घपशु वापि
देवतामात्रेविशेषः। एकादशाहे हानि प्रेताय यागः क्रियते चेत्तर्हि तत्र प्रेतायेति देवतादेशः। अथ यमपितो पशुरर्घपशुवत्कार्यः
तत्र स्तन्मासेन श्राद्धं॥ ॥अथावकीर्णिपशोर्विशेषः। चतुष्पथे अमावास्यायां क्रियते। परिसमूहनादि कृत्वा लौकिकाग्नेः स्थ
पनांते उत्तरतस्तत्रैवोदपात्रस्थापनं। ततो पशुपुरोडाशश्रपणं। गर्दभः पशुः स्नापयित्वोपाकरणं। नियोजनप्रोक्षणाहोमेषु नि
र्ऋत्या इति देवतादेशः। वपाभावान्न वपाहोमः। अवदानहोमोऽप्सु। आघारावाज्येनैव। शिष्टपाकयज्ञविधिः। अत्र कृत्वा [illegible] स्वा
वालायत्वावली स्वकर्मपरिकीर्तयः संवत्सरं भिक्षाचरणं॥ ॥द्वितीयपक्षांतरं। परिसमूहनाद्याघारादि कृत्वाज्याद्याहुतीने
ऽप्याहुतिद्वयमाज्येन। कामावकीर्णोस्म्यवकीर्णोस्मि काम कामाय स्वाहा। इदं कामाय। कामाभिद्रुग्धो स्म्यभिद्रुग्धोस्मि
काम कामाय स्वाहा। इदं कामाय। ततउपस्थापनं। सं मा सिंचंतु मरुतः समिन्द्रः सं बृहस्पतिः। सं मायमग्निः सिंचतु प्रजया
वचनेनेत्येत्यनेन मंत्रेण। ततः प्राशनं॥ ॥अथातः सभाप्रवेशनं व्याख्यायते। सभामाभिमुख्येनेति। सभामभिगिरसि नाम्नि
र्नामासि। त्विषिर्नामासि तस्यै ते नम इत्यनेन मंत्रेण। अथ सभायां विशति। सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ संविदाने

नसो। यो मा न विद्यादुपमा सति ष्ठत्सचेतनो भवतु संगथे जन इत्यनेन मंत्रेण। पर्षदमेत्य जपेत्। अभिभूरहमागमं विरा
डुप्रति वाश्याः। अस्याः पर्षद ईशानः सहसा सुदुष्टरे जन इत्यनुमंत्र्य। स यदि मन्येत मां प्रति क्रुद्धोयमिति तमभिमंत्रयते। या
तएषा प्रघातन्मन्यो क्रोधस्य नाशनी। तां देवा ब्रह्मचारिणो विनयंतु सुमेधसः। द्यौरहं पृथिवी चाहं इत्येतेन क्रोधं नया
सि गां भवत्र्यतर्य सहासावित्यनेन मंत्रेण। असावित्यस्य स्थाने क्रुद्धनाम ग्रहणं। अथ यदि मन्येत द्रुग्धो यामिति तमभिम
नि मंत्रयते। तां ते वाचमास्य आदत्ते हृदय आदधे। यत्र यत्र निहितां वाक्तां ते न हस्तात आददे। एवं हृद्ब्रवीमि तत्सत्यम
मस्य इत्यनेनैव वशीकरं॥ ॥अथातो रथारोहणं। युक्त इति प्रोक्ते। साविराडित्यनेन मंत्रेणैतया च कृत्वाभिमन्त्रा
रथंतरमसीति दक्षिणं चक्रमभिमृशति। बृहदसीत्युत्तरं चक्रं। वामदेव्यमसीति कूबरीमभिमृशति। हस्तेनोपस्थम
भिमृशति। अंकौ न्यंकावभितो रथं यौ ध्वांतं वाताग्रमनुसंचरंतौ। दूरेहेतिरिंद्रियावान् पतत्री ते नो नयः पक्षयं
रयंति त्यनेन मंत्रेण। नमो माणिचरायेति दक्षिणधुर्यं प्राजति गवां मध्ये स्थापयति। अप्रायदेवताः प्रत्यवरोहेत्
स प्रतिब्राह्मणान् मध्ये गाः उपति क्रम्य पितृन् नमस्त्वा ब्रह्मचारिणो सारथ्ये स्यातां मुहूर्त्तमती यायजपेत्॥

रिहरमध्यमेकेमास्तिविहरतिरिति। सयदिदुर्बलोरथःस्यात्तमारुह्य यजपेत्। अयं वा मध्नि नारथो दुर्गेमास्तरोरिषात्पि
सयदिभन्यात्स्तंभमुपस्थ्य भूमिं वा जपेत्। एषवामध्नि नारथो मादुर्गेमास्तरोरिषदिति। फलकथनेनस्यनकाचनातीयः
वतियात्वाध्यानं विनुच्यरथं यवसोदके दापयेदेषडवाहनस्यापकृष्टइतिश्रुतेः॥ ०॥ अथातोहस्त्यारोहणम्। एतस्य ह
ननमभिमन्त्राति। हस्तिपरासमास्तिहस्तिवर्चसमसीतिमंत्रेण। चंपथवरोहति। इंद्रस्यत्वावज्रेणाभ्यभीतिष्ठामिस्वस्ति
मासंपारयेत्यनेनमंत्रेण। एतेनैवमंत्रेणाश्वारोहणं कर्त्तव्यम्। हस्तिशाश्रुस्त्रातेभ्यशाद्भः उष्ट्रमारोक्ष्यन्नभिमंत्रयते
मासंपारयेत्यनेन। रासभमारोक्ष्यन्नभिमंत्रयते। भूद्रोसि भूद्रजन्मागनेयो वै दिरेत
द्रोसित्यहृदेवत्यःस्वस्ति मासंपारयेत्यनेन। रासभमारोक्ष्यन्नभिमंत्रयते। नमोरुद्रायपथिषदे स्वस्तिमासंपारयेति। चतुष्पथमभिमंत्रयते। नमो
स्वस्तिमासंपारयेति। पथानमभिमंत्रयते। नमोरुद्रायपथिषदे स्वस्ति मासंपारयेति। नदीमुत्तरिष्यन्नभिमंत्रयते। नमोरुद्रायाप्सुषदे स्वस्ति मासंपारयेति
रुद्रायचतुष्पथसदे स्वस्ति मासंपारयेति। नदीमुत्तरिष्यन्नभिमंत्रयते। सुत्रामाणमित्यनयर्चा। वनमभि
नावमारोक्ष्यन्नभिमंत्रयते। सुनावमित्यनयर्चोत्तरेष्यन्नभिमंत्रयते। सुत्रामाणमित्यनयर्चा। वनमभिमंत्रयते
त्रयते। नमोरुद्रायवनसदे स्वस्ति मासंपारयेति। गिरिमभिमंत्रयते। नमोरुद्रायगिरिषदे स्वस्ति मासंपारयेति।

गिरिमभिमंत्रयते। नमोरुद्रायगिरिषदे स्वस्ति मासंपारयेति। श्मशानमभिमंत्रयते। नमोरुद्रायपितृषदे स्वस्ति स्वस्ति
मासंपारयेति। गोष्ठमभिमंत्रयते। नमोरुद्रायशकृत्पिंडसदइति। अन्येष्वपिकार्येषु नमोरुद्रायेत्यकेसर्वाणिकार्याणि
कर्त्तव्यानि। सिन्धावभृथोभिमंत्रयते। सिंगासिनवद्रोसिनमस्ते अस्तु मामाहिंसीरिति। स्तनउत्तमभिमंत्रयते। शि
वानवर्षाः संतु शिवानदीः संतु विधातः। शिवानस्ताःसंतु या स्त्वं ह संहन्नासि यत्राहान्याति। शिवीवा इपमानमभिमंत्रयते
शिवोनामासिस्वधितस्ते पिता नमस्ते अस्तु मामाहिंसीरित्यनेन। ज्ञानुर्नि...रपमानमभिमंत्रयते। हिरण्यपर्णे
गुनदेवानां प्राहितंगमः। यमहतनमस्ते अस्तु किंत्वा काकीरिणं ब्रवीदिति। लक्षण्यं वृक्षमभिमंत्रयते। मात्वाशनिर्मा
सुर्माबातोमारुजप्रेषितोदंडः। अंकुरास्तेप्ररोहंतु निवातेत्वाभिवर्षतु। अग्निष्टे मूलंमाहिंसी। स्वस्तिते स्तुवनस्पते
स्वस्तिमेस्तु वनस्पतइति। सयादिकंचित्लभेत तस्मातिगच्छाति द्यौस्त्वाददातु पृथिवीत्वा प्रतिगृह्णात्वित्यनेनमंत्रेः

अथ पयोदने लभे ततस्त्वाति गृह्णामि द्यौस्त्वेति। ततस्तस्योदनस्य त्रिः प्राश्नाति। ब्रह्मणा त्वा प्राश्नामि इति प्रथमा। ब्रह्मणा
त्वा प्राश्नामीति द्वितीया। अथ यदि दमं न लभेत तु तस्त्वाति गृह्णामि द्यौस्त्वेति। तस्य त्रिः प्राश्नाति। ब्रह्मणा त्वा
प्राश्नामीति प्रथमा। ब्रह्मणा त्वा प्राश्नामि इति द्वितीया। ब्रह्मणा त्वा पिबामि इति तृतीया॥ ७॥ अथ तोपीत्याप्यो मेध
निराकरणं प्रातिकर्म्मे विचक्षणीति त्वामे मधुयद्वसः। कर्णाभ्यां भूरि सुश्रुवे मा त्वं [illegible]
मयि। ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि। ब्रह्मकोशोसि सनिरसि शान्तिरस्यनिरा
करणमसि ब्रह्मकोशं मे विश। वाचा त्वापि दधामि वाचा त्वापि दधामीति प्रातिष्ठा
रकरणं कद्योरसदत्यो ग्रहणधारणाद्वारणं शालेमयि जवाप्याप्यायंते मेगानिवाव

[illegible] ब्रह्मश्रोत्रं यशो बलीयन्मे [illegible] मथीतन्मे मनसि तिष्ठतु इति इति॥ ॥ इति श्रीदीक्षित [illegible]
[illegible] गृह्यसूत्रे तृतीय कांड समाप्ती॥ ॥ ग्रंथसंख्या॥ २७५ समस्त ग्रंथसंख्या॥ १००० [illegible]
[illegible]॥ ॥ शके १६०४ दुंदुभि संवत्सरे चैत्र शुक्ल रकादश्यां शनौ ब्रह्मपुर्यां लिखिते यं लक्ष्मण [illegible] रेण ७

पारस्कर गृह्यसूत्रे

वासुदेवी [illegible]

[OrderDescription]
,CREATED=20.07.19 15:45
,TRANSFERRED=2019/07/20 at 16:02:28
,PAGES=50
,TYPE=STD
,NAME=S0001050
,Book Name=M-1950-PARSKARGRAHYSUTT TRITIYA KAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,